Digitized by Arya Samaj Foundation Chennai and eGangotri

12.3 v2

न्दो वैभवम्

(प्रथम सोपानम्)

प्रणेता

आचार्यः, अयोध्या प्रसाद शास्त्री

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्तर-प्रदेश संस्कृत अकादमी प्रदत्त न आर्थिक साहाय्येन प्रकाशितम् ।

छन्दो वैभवम्

(प्रथम सोपानम्)

महर्षि-पाणिनि-प्रज्ञा-अनुसन्धान
तिथी.....
पु०सं०.....1375
भारती पुस्तकालय

प्रणेता :-

आचार्यः अयोध्या प्रसाद शास्त्री

प्रकाशिका :-

इन्दिरा देवी शर्मा

एम०ए० (संस्कृत-हिन्दी) बी०एड०

प्राप्ति स्थानम् :

आचार्य - प्रकाशनम्

आचार्य कुटीर-सत्यनगर

रायबरेली

मूल्यम् २४/-

रूप्यक चतुर्विंशतिः

प्रथम वारम्
१०००
एक सहस्रम्

(सर्वेऽधिकाराः स्वाधीनाः)

संवत् २०४९ वै०

मार्च, १९९२ ई०

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकाशकीयम्

छन्दो-ग्रन्थेषु समेषां वृत्तानां संभविनां भेदानां सामस्त्येन क्वाप्यंकत्र अनुपलब्धेः छन्दो-वाङ्मये वैकल्यमिव अनुभूय समादरणीयेन मम पित्रा आचार्य प्रवरेण श्री अयोध्या प्रसाद शास्त्रिणा 'छन्दो वैभवम्' (प्रथम सोपानम्) नाम अपूर्वं ग्रन्थ रत्नम् उद्भावितम् ।

प्रकृत ग्रन्थे वर्णवृत्तेषु एकाक्षर पाद वृत्ता दारभ्य अष्टाक्षर पाद वृत्तं यावत् समेऽपि सम्भविनः समाख्य वृत्त भेदाः तत्तत् स्वरूप निर्देश पुरः सरं तदनुरूपैः स्व रचितै रुदाहरणै रुपस्कृत्य प्रदर्शिताः ।

सोऽयं ग्रन्थः 'उत्तर प्रदेश संस्कृत अकादमी' प्रदत्तेन रूप्यक चतुः सहस्री मितेनार्थिक साहाय्येन प्राकाश्यंनीतः । एतदर्थम् 'अकादमी' निदेशश महोदयाः सु वहुशो धन्यवादार्हाः ।

प्रकृत ग्रन्थस्य प्रकाशने मुद्रण दोषान् निरसितुं 'प्रूफ' संशोधने सावहिति प्रयस्य, ग्रन्थ गौरवम् अभिवर्द्धयितुम् पाण्डुप्रतिलिपिम् मुद्रितांशं च संख्यात संख्यावताम् अभ्याशं प्रापयितुम् ततस्तेषां सम्मतीश्चोपलब्धुं सु महान्तम् आयासम् अनुभवता पितुः परम विधेयेन प्रमुखान्तेवासिना च शास्त्रि प्रवरेण एम०ए० उपाधि धारिणा श्रीमता द्वारका प्रसाद त्रिपाठिना महदुपकृतम् तदर्थं स सबहु मानं साधुवादार्हः ।

येभ्यो विद्या-वयोवृद्ध मनीषिभ्यः एतद्ग्रन्थ विषये सम्मतयः प्राप्तास्ते सप्रश्रयं सनमस्यं चाभिवन्द्याः ।

तेषाम् अभिवन्द्यतमाः 'प्रयाग विश्वविद्यालयीय' भूत पूर्व कुलपति महोदयाः पण्डित-प्रकाण्डा 'आद्या प्रसाद मिश्राः', चण्डी गढ़स्थ पञ्जाब विश्वविद्यालयीय पत्राचार विभागाध्यक्षा स्तत्रभवन्तः महा महोपाध्यायाः श्री शशिधर शर्माणश्च सविशेषम् आदृत्याः ।

ग्रन्थस्यास्य प्रकाशने समुचितं वास्तविकं च मुद्रण व्ययं स्वीकृत्य अग्रवाल मुद्रणालयस्य **'अग्रवाल प्रिंटिंग प्रेस'** अध्यक्षेण श्री धनींराम श्रेष्ठिना परम सौजन्यम् औदार्यं च प्रदर्शितम् तदर्थं स सधन्यवादम्—

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

"विनीतः सत् सेवा निरति शय सक्तः शुचिमना,
उदारः स्मेरास्यः परम निपुणो मुद्रण विधौ ।
निजां वृत्तिं तन्वन् सतत मनुकूलां समुचितां,
धनी रामः श्रीमानिह सपरिवारो विलसतु ॥"

इत्याशीर्वचसाभिनन्द्यः ।

प्रकाशितोऽयं ग्रन्थः विद्वत् समाजे नूतनां चेतनाम् उद्भावयिष्य तीत्याशंसा पुरः सरम् विरमति वचो विस्तराद् ।

फाल्गुन वदि ५ सोमे, २०४८ वै०
९-३-९२

पाणिनि-प्रेस-अनुसन्धान
तिथी.....
पु०सं०..1375/16
भारती पुस्तक

इन्दिरा देवी शर्मा
एम०ए० (संस्कृत-हिन्दी)
बी० एड०

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

Phone : 53846

Prof. Adya Prasad Mishra
Ex. Vice Chancellor
Allahabad University

26, Balrampur House
Allahabad-2

Ref.

Dated 1-3-92

परमं विदुषां मनीषिणा मनेक शास्त्र पारावार पारीणानां श्रीमतां पण्डित वर्याणामदोध्या प्रसाद शास्त्रिणां "छन्दो-वैभवं" नामाभिनवा कृति दृष्टा । अस्याः कृते द्विविधम् वैशिष्टयम् । प्रथमं त्विदमेंव यद् यान्येकाक्षरात्मकादीनि च्छन्दांसि पूर्वैः सम्भावितानि तानि साकल्येनास्मिन् ग्रन्थे पण्डित वर्यैः विवेचितानि । अष्ट वर्णात्मकस्यानुष्टुभः प्रायेण एक एव भेदः प्रचलितो दृश्यते, तस्य शत द्वया दप्यधिका भेदा अत्र प्रदर्शिताः ।

द्वितीयं वैशिष्टय मिदमेव यत् सर्वेषा भेदोपभेदाना मुदाहरणान्यति दुर्लभानि स्वयमेव विरच्य दत्तानि । अनेन शेमुषी जुषां पण्डितवराणा मद्भुत काव्य प्रतिभापि प्रदर्शिता भवति ।

एतादृश्या अनुपमकृतेः कृते कृतिनो विद्वद्वरेण्याः अस्मादृशां सर्वेषां संस्कृत विद्यानुरागिणां धन्यवादार्हाः ।

सर्वं संस्कृत जगदेतस्य कृते भावि काले पण्डित वराणां श्रीमदयोध्या प्रसाद शास्त्रिगा मृणी भविष्यति ।

किमधिकं वचो-विस्तरेणेत्यत्रैव विरम्यते वाग्व्यापारात् ।

हस्ताक्षराणि
(आ० प्र० मिश्र)
आद्या प्रसाद मिश्रस्य

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

महर्षि-पाणिनि-प्रज्ञा-अनुसन्धान
तिथी.....
पु०सं०.....
भारती पुस्तकालय

PC
CC

DIRECTORATE OF
CORRES PONDENCE
COURSES

PUNJAB UNIVERSITY
CHANDIGARH-160014

"अभिमतम्"

अहमाचार्य श्रीमदोध्या प्रसादेन कृतां 'छन्दो वैभवम्' इत्याख्यां कृतिं दर्शं दर्शं हर्ष प्रकर्षं मन्वभवम् ।

छन्दः शास्त्रं खलु परम पुरुष निःश्वसित भूताया निसर्ग पूताया भगवत्याः श्रुतेः षट्स्वङ्गेष्वन्यतमम् । छन्दः पादौतु वेदस्य इत्युक्तेः पादा वाधार इति यावत् । अतएव छन्द इत्यपि निगमगव्या व्यपदेशः । प्राचीनेषु नवीनेषु चासङ्ख्येषु छन्दो विवेचन विवरण परायणेषुग्रन्थेषु तिष्ठत्स्वेव "छत्दो वैभवस्य" सारस्य सारल्य माधुर्यधुर्यतया स्वीयमेव वैभवम् ।

न केवलमियत्, प्रतिपद्यं लोकाभिरामस्य भगवतो रामस्य कथां चेद मशेषव्यथापहा माश्रित्य प्रवृत्तमिति काञ्चने सौरभस्यायं संयोगः ।

तदेवं मौलिकं नूत्नमिमं प्रयत्न महं हृदाभिनन्दामि । अकारण करुणा वरुणालयो भगवानयोध्यापतिः सुधीश्वरमयोध्या प्रसादं स्वप्रसाद पात्री करोतु, नैरुज्यनीराजितं दीर्घमायु श्चास्मै वितरतुतराम् इति ।

९-३-९२

गुणगणवशंवदस्य
शशिधर शर्मणः

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

संक्षिप्तः

प्रणेतृ - परिचयः

'एटा' मण्डल मण्डनं सुविदितं, वाराहतीर्थं महत्,
'सोरों' नाम तदन्तिके श्रुतवतां, ग्रामोऽस्ति 'हीडल्ल् पुरम्'।
तत्रासीद् द्विजराज शेखर मणिः 'श्री डाल चन्द्रः' सुधीः,
तस्योदात्तगुणोऽन्वितः प्रतिभया, पुत्रः कनिष्ठोऽभवत् ॥१

पित्रोर्यविष्ठ पूमपत्यतयाभिजातः,
प्रीतिं नितान्त मुचिताभ्यधिकामवाप्तः।
मेधा गुणाङ्क कलनाध्ययन प्रसक्तो,
दूरं व्यगाढ स हि संस्कृत वाङ्मयाब्धिम् ॥२

आचार्यो यः, सुरनर गिरां, संस्तुतो धीं धनाढयो,
वाशिष्ठः सत् कविषु गणितो, विप्रवर्यः'सनाढ्यः'।
वैदुष्येणाप्रतिम सुधिया, विद्वदग्रे गणेयो,
धन्यो वाग्मी, विनय विभवः, कर्मकाण्ड प्रवीणः ॥३

विष्वक् ख्यातो, विमल चरितः शिष्य सम्बोधनेच्छुः,
प्रेम्णा नाम्ना गुरुभिरुदितः'रामरूपयोध्या प्रसादः'।
वृत्त्यासोऽयं चिरमधिवसन् 'राय' पूर्वां 'बरेली'
प्रीत्या पुत्रानिव सुमनसाध्यापिपच्छात्र वर्गान् ॥४

छन्दो वैभव मातेने,
तेनेदं वाक् प्रसादतः।
भक्त्या समर्पितं तस्यै,
स्मृता सा संप्रसीदतु ॥

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

महर्षि-पाणिनि-प्रज्ञा-अनुसन्धान
तिथी.....
पु०सं०.1375.



प्रणेता– आचार्यः अयोध्या प्रसाद शास्त्री
एम० ए०
व्याकरण-साहित्याचार्यः, साहित्य रत्नम्

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

संक्षिप्तः

प्रणेतृ - परिचयः

'एटा' मण्डल मण्डनं सुविदितं, वाराहतीर्थं महत्,
'सोरों' नाम तदन्तिके श्रुतवतां, ग्रामोऽस्ति 'होडल् पुरम्'।
तत्रासीद् द्विजराज शेखर मणिः 'श्री डाल चन्द्रः' सुधीः,
तस्योदात्तगुणोऽन्वितः प्रतिभया, पुत्रः कनिष्ठोऽभवत् ॥१

पित्रोर्यविष्ठ पूमपत्यतयाभिजातः,
प्रीतिं नितान्त मुचिताभ्यधिकामवाप्तः।
मेधा गुणाङ्क कलनाध्ययन प्रसक्तो,
दूरं व्यगाढ स हि संस्कृत वाङ्मयाब्धिम् ॥२

आचार्यो यः, सुरनर गिरां, संस्तुतो धीं धनाढयो,
वाशिष्ठः सत् कविषु गणितो, विप्रवर्यः 'सनाढयः'।
वैदुष्येणाप्रतिम सुधिया, विद्वदग्रे गणेयो,
धन्यो वाग्मी, विनय विभवः, कर्मकाण्ड प्रवीणः ॥३

विष्वक् ख्यातो, विमल चरितः शिष्य सम्बोधनेच्छुः,
प्रेम्णा नाम्ना गुरुभिरुदितः 'शारदयोध्या प्रसादः'।
वृत्त्यासोऽयं चिरमधिवसन् 'राय' पूर्वां 'बरेली'
प्रीत्या पुत्रानिव सुमनसाध्यापिपच्छात्र वर्गान् ॥४

छन्दो वैभव मातेने,
तेनेदं वाक् प्रसादतः।
भक्त्या समर्पितं तस्यै,
स्मृता सा सत्प्रसादतु ॥

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रणेता– आचार्यः अयोध्या प्रसाद शास्त्री
एम० ए०
व्याकरण-साहित्याचार्यः, साहित्य रत्नम्

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीः

प्राक् कथनम्

'छन्दः पादौ तु वेदस्य' इत्युक्तेः वेदाङ्गतया छन्दसामृ अपि आविर्भावः वेदराशि समकालिक एव, इति नात्र कोऽपि विवादावसरः ।

लोके छन्दसां प्रादुर्भावात् पूर्वं वेदराशावेव तेषां प्रचुरः प्रगोगः समदृश्यत । अतएव 'तात्स्थ्याद्' इति हिद्धान्तात् समस्तो वेद राशिरेव महर्षि पाणिनिना छन्दः शब्देन व्यवहृतः । यथा– "बहुलं छन्दसि, छन्दसि च, छन्दसि शायजपि, छन्दसि परेऽपि, नेतराच्छन्दसि, णेश्छन्दसि" इत्यादि भिरनेकैः तदीयाष्टाध्यायीस्थ सूत्रैः व्यज्यते ।

छन्दो ज्ञानं विना वेद राशेः परिशीलनम् अध्ययनम् अध्यापनम्, यजनं याजनं वा निषिद्धं प्रत्यवाय जनकं चेति श्रुति प्रसिद्धम् ।

महर्षि पाणिनिनापि त्रेद राशेः षडङ्गानाम् उल्लेखं कुर्वता साङ्गस्यैव तस्य अध्ययनं महत्त्वाधायीति प्रतिपादितम् ।

तथाहि–

"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठयते ।
ज्योतिषामयनं चक्षु निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मातृ साङ्गमधीत्यैव, ब्रह्म लोके महीयते ॥" इति

लोके छन्दोऽवतारा आदि कवि वाल्मीकेः क्रौञ्चद्वन्द्ववियोगोत्थ शोकोद्गार च श्लोक रूपण परिणतात्–

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

"मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमबधीः काम मोहितम् ॥"

इति पद्यादेव सर्वमान्यः ।

लोके छन्दसां प्रचारेजाते छन्दः शास्त्र सम्बन्धिनः पिङ्गलसूत्र, छन्दो मञ्जरी–छन्दो विचिति सुवत्त तिलक प्रभृतयः अनेके ग्रन्थाः प्रकाशमायाताः ।

आधुनिक काले तु सर्वत्र प्रदेशेषु प्रचलितः सरलः सुबोधः भट्ट केदार प्रणीतः वृत्तरत्नाकराभिधः आदर्श भूतश्छन्दोग्रन्थः सर्वमान्यः संस्मर्यते । अत्रोपयोगींनि कति चित् तथ्यानि तत एव साभारम्उद्धृतानि ।

काव्य सागर मवजिगाहिषूणां छन्दो ज्ञानं परमावशकमिति न तिरोहितं विदुषाम् । अत एव महाकवि दण्डिना–

पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा । इत्युपक्रम्य

छन्दो विचित्यां सकलस्तत् प्रपञ्चो निदर्शितः ।
सा विद्या नौस्तितीर्षूणां गम्भीरं काव्य सागरम् ॥ इतिप्रोक्तम्

लौकिकं छन्दः मात्रा वर्ण भेदेन द्विप्रकारक माम्नातम् । तदुक्तं वृत्त रत्नाकरे–

"पिङ्गलादिभिराचार्यै र्यदुक्तं लौकिकं द्विधा ।
मात्रा वर्ण विभेदेन छन्द स्तदिह कथ्यते ॥ इति

इदमेव तथ्यम् 'वृत्तं जातिरिति द्विधा' इति ब्रुक्ता महाकवि दण्डिना आविष्कृतम् ।

अत्र नवीने युगे मात्रा छन्दसाम् आर्या प्रभृतीनाम् प्रचलनम् अल्पतरं ह्रासोन्मुखं च परिलक्ष्यते । वर्ण वृत्तानां प्रचलनं तु अनुदिनं प्रभूतोत्कर्ष मावहतीति तद् विषय एव अत्र किंचिदुल्लिख्यते–

वर्ण वृत्तम्, 'साधारण–दण्डकं' भेदेन द्विधाभिद्यते तत्र एकाक्षर पाद वृत्तादारम्य षड् विंशत्यक्षर पाद वृत्तं यावत् साधारण संज्ञा व्यवहारः तदूर्ध्वं तु दण्डक व्यवहारः । तदुक्तम्

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

"आरम्यैकाक्षरात् पादादेकैकाक्षर वर्धितैः ।
पृथक् छत्दो भवेत् पादै यवित् षड्विंशति गतम् ॥
तदूर्ध्वं चण्डवृष्टयादि दण्डकाः परिकीर्तिताः ।" इति

साधारण वृत्तम् समम् अर्ध समम्, विषमं चेति भेदैन त्रिधा विभज्यते। तदुक्तम्

"समर्मर्ध समं वृत्तं विषमं च ततः परम्" इति

एतेषां त्रयाणामपि नामानुरूपाण्येव लक्षणानि वेदितव्यानि। स्पष्ट प्रतिपत्तये तु पुनरिदमुच्यते–

"अङ्घ्रयोयस्य चत्वार स्तुल्य लक्षण लक्षिताः ।
तच्छन्दः शास्त्र तत्त्वज्ञाः समं वृत्तं प्रचक्षते ॥
प्रथमाङ्घ्रि समो यस्य तृतीयश्चरणो भवेत् ।
द्वितीयस्तुर्यवद् वृत्तं तदर्ध सम मुच्यते ॥
यस्य पाद चतुष्केऽपि लक्ष्म भिन्नं परस्परम् ।
तदाहुर्विषमं वृत्तं छन्दःशास्त्र विशारदाः ॥" इति

उक्त वर्ण वृत्तातिरिक्तानि देशे विदेशेषु च यत्र तत्र प्रचलितानि न्यूनाधिकाक्षर पादानि अनियत पादानि यदृच्छाभिधानानि त्रिशूलादि नाम व्यवहार्याणि वृत्तानि पाद व्यवस्था रहितानि अनियताक्षराणि गद्यगीतानि च गाथेति सामान्य संज्ञया समाख्यायन्ते। तदुक्तं वृत्त रत्नाकरे–

"शेषं गाथास्त्रिभिः षड्भिश्चरणैश्चोप लक्षिताः ॥" इति

अत्र त्रिभिः षड्भिः इति उपलक्षणतया वर्णानाम् पादानां च अनियमः प्रख्यायते ।

एवं च एतादृशानि वृत्तानि अमुक देश प्रसूतानि इति केषां चित् सावलेपोक्ति निरवकाशा ।

अत्र विषये भ्रान्ताः तत्वम विद्वांसः केचिदत्रत्या अपि पण्डितम्मन्या स्तथा ब्रुवते। तदुद् बोधनाय इहापि संगमनीय तया–

यदि हास्ति तदन्यत्र, यन्नेहास्ति न तत् क्वचिद्" इति भारतोद्घोषः संस्मार्यते ।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरु लघु सूचकाभ्यां ग ल वर्णाभ्याम्, म(sss)य(Iss) र sIs, स IIs, त ssI, ज IsI, भ sII, न III इति गण सूचकैः म्यरस्त जभयैः अष्टाभिरक्षरैश्च मेलयित्वा दशभिरक्षरैः समस्तमेव वाङ्मयम् विष्णुना त्रैलोक्यमिव व्याप्तम् । तदुक्तम्

"म्यरस्तजभनगैर्लन्तैरेभिर्दशभिरक्षरैः ।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥" इति

एवं च 'निराला' प्रभृतीनां 'हिन्दी' कवीनाम् अनियत वर्ण-पाद-वृत्तानि, साम्प्रतं लब्ध प्रसराणि गद्यगीतकानि च गाथास्वेव समावेश-मर्हन्ति । एवं चेदानीं गद्य-पद्य भेदस्तिरोहित प्राय एव । गेयत्वमेव उभयो र्भेदक मेषितव्यम् ।

तथा चात्र विषये ममाभिगतं समीक्षणोयम्–

"गीतं मद्यमयं भवेदिति न हि प्राचां वचः पेशलं,
गेयं गद्यमपीह काव्य कुशलास्तन्वन्ति हृद्यं परम् ।
गेयत्वं ननु भेदकं तदुमयोः पद्ये च गद्येऽधुना,
स्वीकार्यं कवि सार्थजुष्ट मितरद् दोषावहं केवलम् ॥ इति

इत्यलं प्रसक्तानुप्रसक्त्या, प्रकृत मनुस्रियते– साधारण संज्ञक वृत्तानां समार्धं सम विषमभेदेषु केषांचि देव भेदानां लक्षणानि नामानि उदाहरणानि च तत्तद् ग्रन्थेषु उपलभ्यन्ते, नतु समेषामपि संभविनां भेदानां नामानि लक्षणानि वा । बहवोऽप्रचलित भेदास्तु अष्पृष्टा एव ।

एकाक्षर पाद वृत्तमारभ्य षड्विंशत्यक्षर पाद वृत्तं यावत् छन्दः-शास्त्रे प्रत्येकस्य पृथग् जाति संज्ञा प्रतिपादिता । तथाहि–

"उक्ता त्युक्ता तथा मध्या प्रतिष्ठान्या सु पूर्विका ।
गायत्र्युष्णिगनुष्टुप्च बृहती पङ्क्ति रेव च ॥
त्रिष्टुप् च जगती चैव तथाति जगती मता ।
शक्वरी साति पूर्वा स्यादष्टयत्यष्टी ततः स्मृते ॥

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धृतिश्चाति धृतिश्चैव कृतिः प्रकृति राकृतिः ।
विकृतिः संकृतिश्चैव तथाति कृति रुत्कृतिः ॥
इत्युक्ताश्छन्दसां संज्ञाः – – – – ॥" इति

एवं जगति समाख्यया ख्याताना मेषां वृत्तानां संभविनां सम संज्ञक भेदानां विषये विशेषेतोऽवधेयमिदमुच्यते–

एकाक्षर पाद वृत्ते एकमक्षरं गुरु (s) अथवा लघु (।) एव संभवति, अत स्तत् प्रयुक्तौ द्वौ भेदौ संभवतः ।

द्व्यक्षर पाद वृत्ते द्वावपि वर्णौ गुरु (ss) अथवा लघू (।।) क्वचिद् आदि वर्णः गुरुः द्वितीयो लघुः (s।) क्वचिच्चादिमो वर्णः लघुः पश्चात्तनश्च गुरुः (।s) संभवति । ततश्चत्वारो भेदाः संभवन्ति ।

यथा– (१) ss
(२) ।।
(३) s।
(४) ।s

त्र्यक्षर पाद वृत्तेतु 'म-य-र-स-त-ज-भ-न' इति गण क्रमेण

(१) sss म
(२) ।ss य अष्टौ भेदाः संभवन्ति ।
(३) s।s र
(४) ।।s स
(५) ss। त
(६) ।s। ज
(७) s।। भ
(८) ।।। न

तात्पर्यमिदम् पादे एकाक्षर वृद्धौ सत्याम् पूर्वजात्यपेक्षया समभेद संख्या ततोद्विगुणा सम्पद्यते ।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं च चतुरक्षर पाद वृत्ते १६ षोडश
पञ्चाक्षर पाद वृत्ते ३२ द्वात्रिंशत्
षडक्षर पाद वृत्ते ६४ चतुष्षष्टिः
सप्ताक्षर पाद वृत्ते १२८ अष्टाविंशत्युत्तरैकशतम्
अष्टाक्षर पाद वृत्ते २५६ षट् पञ्चाशदुत्तर द्विशतम्

भेदाः संभवन्ति । एव मग्रेऽपि अनेन क्रमेण भेदा बोध्याः । एतेषां वर्ण वृत्तानां सम संज्ञकेषु भेदेषु कतिपय भेदावा मेव लक्षणानि नामानि च ग्रन्थेषूपलम्भनो नतु समेषामपि संभविनां भेदानाम् का कथा अर्धसम विषम भेदानां सामस्त्येनेति ।

उदाहरणार्थम्—

	म	र	
त्र्यक्षर पाद वृत्तेषु	sss	sIs	मोनारीं, रोमृगी ।

	भ	ग	
चतुरक्षर पाद वृत्तेषु	sss	s	भ्गौ चेत् कन्या ।

	भ	ग	ग	
पञ्चाक्षर पाद वृतेषु	sII	s	s	भ्गौ गिति पङ्क्तिः ।

	त	य	
षडक्षर पाद वृतेषु	ssI	IIss	त्यौ स्त स्तनुमध्या ।
	न	य	
	III	IIss	शशिवदना न्यौ ।
	म	म	
	sss	sss	विद्युल्लेखा मो मः ।
	त	स	
	ssI	IIs	त्सौ चेद् वसुमती ।

	म	स	ग	
सप्ताक्षर पाद वृत्तेषु	sss	IIs	s	म्सौ गः स्यान्मद लेखा ।

	स	र	ग	
	IIs	sIs	s	सरगै र्हंस माला ।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज स ग
।s। ।-s s कुमार लतिका ज्सौ गः ।
त भ ग
ss। s।। s चूडामणिस्तभगात् ।
म म ग ग
अष्टाक्षर पाद वृत्तेषु sss sss s s मोमो गोगो विद्युन्माला ।
भ भ ग ग
s।। s।। s s मौ गिति चित्र पदा गः ।
भ त ल ग
s।। ss। । s भात् त लगा माण वकम् ।
म न ग ग
sss ।।। s s म्नौ गौ हंसरुतमेंतत् ।
र ज ग ल
s।s ।s। s । जौं समानिका गलौ च ।
ज र ल ग
।s। s।s । s प्रमाणिका जरौ लगौ ।
त र ल ग वितान माभ्यामन्यत् ।
ss। s।s । s नाराचिका तरौ लगौ ।

इत्यादि वहु प्रचलित भेदाना मेव लक्षणानि नामानि च छन्दो ग्रन्थेषु दृश्यन्ते । अवशिष्ट भेदानां नामानि नोपलभ्यन्ते, लक्षणानि तु स्वरूप सिद्धानि सम्भवन्ति ।

मया तु प्रस्तुत ग्रन्थे काक्षर पाद वृत्तादारभ्य अष्टाक्षर पाद वृत्तं यावत् समच्छन्दसां सम्भाविनां समस्त भेदानां स्वरूप प्रदर्शन पुरःसरं तदनुरूप पद योजनया तत्तद् निदर्शन मपि प्रदर्शयितुम् व्यवसितम् । तेषां लक्षणानि तु स्वरूपत एव सिद्धानि । तन्नाम करणं तु सुधीभिरेव साध्यम् । तावत्तानि उक्तादि जातिगत स्व भेद संख्ययैव व्यवहर्तव्यानि । सुसंस्कृत मतयो मनीषिणः यथावसरं तानि व्यक्तिगत नामभिः विभूषयिस्यन्तीति बलीयान् मे विश्वासः ।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ममायं प्रयासः सुधियां विशेषतया प्रतिभा साधन सम्पन्नानां प्रोत्साहनार्थं मस्ति, यत् तेऽपि नवाक्षरादि पाद जातीनां समस्त भेदोन्मीलने स्वाभिरुचिं प्रदर्श्य सुस्सरस्वती समुपासनाय समुचित मवसरं दद्युः ।

मया प्रकृत ग्रन्थे वृत्त प्रणयने प्रायो राम कथैवाश्रिता यत्र तत्र भक्ति-वैराग्य-नीति विषयकमपि पद गुम्फनम् अकारि ।

इत्थमेव अग्रिम जाति वृत्त भेदानां निरूपणे सविशेषाभिरुचौ सत्यामपि तत्सम्पादनं समय-साधन सापेक्षमिति सम्प्रति इतोऽग्राभिसरणाद् विरम्यते ।

सति चानुकूल विधौ 'द्वितीय सोपान' मारोढुम् 'वृहती' भेदान् अचिरेणैव विवरीतुं प्रयतिष्ये ।

चेदनेन प्रकरणेन जिज्ञासूनां संस्कृतानुरागिणां यत् किमपि मनो-रञ्जनं स्यात् तदहमात्मान मुपकृतं कृतकार्यं च सम्भावयेयम् ।

सुसंस्कृत मतयो विपश्चितोऽनेन प्रोत्साहिता मार्गमेत मनुस-रिष्यन्तीन्याशासानः गुणागृह्यान् मनीषिणः—

"अधीतिनः संस्कृत वाङ्मये बुधा,
स्तथा पुरोभागि गुणेन वर्जिताः ।
समीक्ष्य मूल्याङ्कन मस्य साम्प्रतं,
विमत्सरा आकलयन्तु साम्प्रतम् ॥"

इति भूयो भूयोऽभ्यर्थयते

विद्वद्विधेयः

अयोध्या प्रसाद शास्त्री

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीः

"छन्दो वैभवम्"

[प्रथम सोपानम्]

प्रेयः श्रेयः प्रदायी, विबुधगणपति, र्ज्ञान विज्ञान राशिः,
प्रत्यूह व्यूह हारी, रिपुकुलशमनः, श्रीमहैश्वर्य शाली ।
भक्तार्तिध्वंस कारी, सकल गुण निधि, नित्यकारुण्यमूर्ति,
दिश्यात् सर्वार्थ सिद्धि, सतत शुभकरः, सुध्युपास्यो द्विपास्यः ॥

उक्तात्युक्तादिसंज्ञैः, कवि कुलकलितै, र्वाङ्मयंव्याप्त मेतद्,
वृत्तै स्तेष्वेव कैश्चिद् रघुवर चरितं, विश्रुतं विष्टपेऽस्मिन्,
उल्लिख्योल्लिख्य भूयो, विबुधगिरमिमां, भावयन् भूरिभावां,
रामाङ्कं वृत्तचित्रं, बुधजन हृदय, प्रीतये दर्शयामि ॥

उक्ता

१ऽ वा, चम् ।
दे, वीम् ॥
व, न्दे ।
नि, त्यम् ॥ युग्मम्

२। ज, य ।
शि, व ॥
ह, र ।
ह, र ॥ युग्मम्

— ● —

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्युक्ता

१ऽऽ रामो, राजा ।
त्रेता, मध्ये ॥
आसीत्, सीता ।
जाया, तस्य ॥ युग्मम्

२।ऽ भजे, हरम् ।
सदा, शिवम् ॥ १
प्रभो, जने ।
दयां, कुरु ॥ २

३ऽ। लोक, नाथ ।
राम, पाहि ॥ १
भक्त, माशु ।
रक्ष, नाथ ॥ २

४॥ रघु, वर ।
जय, जय ॥ १
अघ, हर ।
जय, भव ॥ २

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मध्या

१-ऽऽऽ पापौघात्, त्रातारम् ।
वन्देऽहं, श्री रामम् ॥
अध्यध्वं, तं रामम् ।
गच्छन्तं, निर्भीकम् ॥
सुन्दस्त्री, सा टोपा -
गर्जन्ती, दुद्राव ॥ युग्मम्

२-।ऽऽ भवाब्धि, तरीतुम् ।
परेशं, नमामि ॥

३-ऽ।ऽ शर्मदो, राघवः ।
सर्वदा, त्रायताम् ॥
दीक्षितो, गाधिजः ।
स्वं मखं, रक्षितुम् ॥
सानुजं, राघवम् ।
स्वाश्रमं, नीतवान् ॥ युग्मम्

४-।।ऽ रमया, सहितः ।
रमतां, मनसि ॥
अबला, हननम् ।
उचितं, न खलु ॥
श्रुतवा, नपि सः ।
मुनिना, भिहितः ॥
प्रमदा, मपिताम् ।
इषुणा, हतवान् ॥ विशेषकम्

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मध्या

५-ऽऽ। सन्ताप, नाशाय ।
तन्नाम, कल्पेत ॥

६-।ऽ। निजेषु, जनेषु ।
प्रसीद, सदैव ॥

७-ऽ।। लोकप, राघव ।
मामभि, रक्षय ॥

८-।।। कमल, नयन ।
स्वजन, भवतु ॥

— ● —

प्रतिष्ठा

१-ऽऽऽऽ पूर्णानन्दो, रामाख्येन्दुः ।
सीतानाथो, भक्तानव्यात् ॥१
लोकत्राता, सर्वाभिज्ञः ।
रामोदिश्याद्, भक्ताभीष्टम् ॥२

२-।ऽऽऽ सदाधार, श्चिदानन्दः ।
महोदारो, दयासिन्धुः ॥१
जगन्नाथः, स सौमित्रिः ।
जनानव्याद्, भवार्णवात् ॥२ युग्मम्

३-ऽ।ऽऽ पूतनामा, राम भद्रः ।
सर्वशक्तः, कौशलेन्द्रः ॥१
लोकनाथो, रावणारिः ।
शर्मदिश्यात्, सोऽनुसर्गम् ॥२ युग्मम्

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिष्ठा

४-।।ऽऽ गुरुसेवी, रघुनाथः ।
जगदीशो, जनमव्यात् ।।१
जनबन्धो, परमात्मन् ।
भवसिन्धोः, नय पारम् ।।२

५-ऽऽ।ऽ सीतापते, लोकाधिप ।
भक्तार्तिहम्, शोकं जहि ।।

६-।ऽ।ऽ महेश्वरो, महायशाः ।
महाशयो, महाबलः ।।१
अभीष्टदो, जगत्प्रभुः ।
दयानिधिः, प्रसीदतु ।।२ युग्मम्

७-ऽ।।ऽ राममणिः स्वान्तहितः ।
नाशयता, ल्लोकतमः ।।

८-।।।ऽ नरवरः, सदयितः ।
अवतुमा, मघ हरः ।।

९-ऽऽऽ। विश्वामित्र, यज्ञारक्ष ।
सीतानाथ, लोकान् पाहि ।।

१०-।ऽऽ। दयाधार, महोदय ।
जनाभीष्ट, मरं यच्छ ।।

११-ऽ।ऽ। उद्धराशु, राघवेन्द्र ।
जन्मबन्ध, मस्यनाथ ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिष्ठा

१२-।।ऽ। जनताप, -- हर राम ।
कृपयाव, रघुनाव ।।

१३-ऽऽ।। हंसान्वय भक्तप्रिय ।
सर्वेश्वर, लोकानव ।।

१४-।ऽ।। महाभुज, जनेश्वर ।
सदाशय, प्रसीदतु ।।

१५-ऽ।।। दुःखहर, सर्वहित ।
शं वितर, राम जय ।।

१६-।।।। रघुवर, जय जय ।
अघ चय, मप नय ।।

— ● —

सुप्रतिष्ठा

१-ऽऽऽऽऽ संसाराम्भोधेः सेतुः श्रीरामः ।
लोके कल्पद्रुः, शश्वत् संसेव्यः ।।

२-।ऽऽऽऽ त्रिलोक स्वामी, शिवः सत्यः सः ।
जनानां श्रेयो, विधत्ते नित्यम् ।।

३-ऽ।ऽऽऽ भ्रातृभिः सार्धं, राम भद्रः सः ।
राजतेऽत्यर्थं, जानकी नाथः ।।

४-।।ऽऽऽ हृदये ध्यातः, परमोदारः ।
दुरितं दूरी, कुरुते रामः ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुप्रतिष्ठा

५-ऽऽ।ऽऽ लोकाधिनाथं, भक्त प्रियं तम् ।
रामं रमेशं, वन्दे सदैव ।।

६-।ऽ।ऽऽ रणाङ्गणे यो, रिपून् हिनस्ति ।
हितैषिणं तं, नमस्करोमि ।।

७-ऽ।।ऽऽ कोसल नाथो, धर्म धुरीणः ।
भक्त-हितैषी, दुर्जन - हन्ता ।।

८-।।।ऽऽ सुजन रक्षी, दनुज हन्ता ।
विबुधवन्द्यो, भुवन नाथः ।।

९-ऽऽऽ।ऽ कौशल्यात्मजो, विष्णुः प्रोच्यते ।
आराध्यः सतां, नित्यं सेव्यताम् ।।

१०-।ऽऽ।ऽ उदाराशयः, प्रजा वत्सलः ।
स रामाभिधः, सदा सेव्यताम् ।।

११-ऽ।ऽ।ऽ जानकी प्रियो, लोक पालकः ।
भक्त वत्सलः, पातु सर्बदा ।।

१२-।।ऽ।। स महायशा, भरताग्रजः ।
जनकात्मजा - पतिरिज्यताम् ।।

१३-ऽऽ।।ऽ लोकाभिमतो, रामः सुमुखः ।
सद्भिः प्रयतैः, सेव्यः सततम् ।।

१४-।ऽ।।ऽ उदारमतिः, स्वधर्म रतः ।
दयालु रसौ, जनान वतात् ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुप्रतिष्ठा

१५-ऽ।।।ऽ धर्म निरतो, नीति निपुणः ।
दार सहितः, शर्म दिशतात् ।।

१६-।।।।ऽ भुवन पतिः, नय निरतः ।
सुकृत रतिः, जयति सदा ।।

१७-ऽऽऽऽ। त्रैलोक्यं भाति, भासा तस्यैव ।
योऽध्यक्षो नित्य, मन्तर्भूतेषु ।।

१८-।ऽऽऽ। प्रभु र्लोकस्य, स रामो नाम ।
अपायात् पातु, सतां भद्राय ।।

१९-ऽ।ऽऽ। सर्वदा पातु, राम भद्रो हि ।
अन्तरात्मोति, विश्रुतः सोऽत्र ।।

२०-।।ऽऽ। पितुरादेश, मभि संधाय ।
वनमध्युष्य, जहि रक्षांसि ।।
जय लोकेश, स्वजनान् पाहि ।
अघमुच्छिद्य, दिशताच्छर्म ।। युग्मम्

२१-ऽऽ।ऽ। राम प्रसीद, लोकान् प्रशाधि ।
दास स्तवास्मि, मोहो व्यपैतु ।।
लोकान् स पातु, रामः सदैव ।
धर्मं चरन्तु, लोका यथात्र ।।

२२-।ऽ।ऽ। भवाब्धि पार, मरं नयेश ।
दया परो हि, प्रभुस्त्वमेव ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुप्रतिष्ठा

२३-ऽ।।ऽ। उद्धर नाथ, राम रमेश ।
धर्म धुरीण, मामभिरक्ष ।।

२४-।।।ऽ। भुवन नाथ, मयि दयस्व ।
अघ मपैतु, सुकृत मेतु ।।

२५-ऽऽऽ।। भक्तान् पालय, मोहं नाशय ।
पापाद् वारय, धर्मे योजय ।।

२६-।ऽऽ।। जगत् संश्रय, जनानुद्धर ।
धूर्तिं धारय, मूर्तिं वारय ।।

२७-ऽ।ऽ।। राम लोकप, धर्म मुन्नय ।
पाप माजहि, पुण्य मेधय ।।

२८-।।ऽ।। रजनीचर - कुल नाशक ।
भुवि सज्जन - प्रति पालक ।।
जन-रञ्जन, जगदीश्वर ।
जगदेधय, परि पालय ।।युग्मम्

२९-ऽऽ।।। भक्तिं दिशतु, लोकानवतु ।
क्लेशान् हरतु, मोदं नयतु ।।

३०-।ऽ।।। जनानवतु, मुदं दिशतु ।
अघं हरतु, शिवं भवतु ।।

३१-ऽ।।।। मङ्गल कर, लोक शरण ।
भक्त विभव, मामव भव ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुप्रतिष्ठा

३२-।।।।। भय हरण, जन भरण ।
शुभ करण, जय नृवर ।।

— ● —

गायत्री

१-ऽऽऽऽऽऽ दिश्याच्छ्रेयो नित्यं, भिद्यान्मोहध्वान्तम् ।
धेयाद्धाता लोकान् लोकाध्यक्षो रामः ।।

२-।ऽऽऽऽऽ स सर्वान्तर्यामी, जगद्धाता रामः ।
सदाराध्यः पुंसां, क्रियान्नित्यं श्रेयः ।।

३-ऽ।ऽऽऽऽ सज्जनानां त्राता, भक्ति वश्यो रामः ।
दुर्जनानां क्षेप्ता, शश्वदव्याल्लोकान् ।।

४-।।ऽऽऽऽ जगदीशो रामः, भवबन्धं भज्यात् ।
सुजनानुद्धर्तुं, दृढ संकल्पो यः ।।

५-ऽऽ।ऽऽऽ श्रेयः प्रदातारं, लोकाधिनाथं तम् ।
भक्त प्रियं रामं, सीतापतिं वन्दे ।।

६-।ऽ।ऽऽऽ भवाब्धि ताराय, जनार्ति नाशाय ।
त्रिलोक नाथाय, नमोऽस्तु रामाय ।।

७-ऽ।।ऽऽऽ मोहतमोध्वंसी, लोक मणी रामः ।
सज्जन कल्पद्रुः, संतत माराध्यः ।।

८-।।।ऽऽऽ सृजति यो लोकान्, अवति चाश्रान्तम् ।
हरति भूयस्तान्, स्मरत तं रामम् ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गायत्री

९-ऽऽऽ।ऽऽ साधूनां सहायं, तं धर्मावतारम् ।
ब्रह्माण्डाधि नाथं, श्रीरामं नमामि ॥

१०-।ऽऽ।ऽऽ सदा जागरूकः, प्रजानां हिताय ।
शिवः सत्यरूपः, समाराधनीयः ॥

११-ऽ।ऽ।ऽऽ पाप पुञ्ज हन्ता, सज्जनाधि हर्ता ।
कोसलाधिनाथः सर्वदा स पायात् ॥

१२-।।ऽ।ऽऽ अघ पुञ्ज हारी, जगदीश्वरः सः ।
सततं जनाना, मभयं प्रदेयात् ॥

१३-ऽऽ।ऽऽ रक्षः कुल शत्रुः, नित्यं जन बन्धुः ।
रामो जगदीशः, श्रेयो वितरेत् सः ॥

१४-।ऽ।।ऽऽ नितान्त मुदारो, जनानभिरक्ष्यात् ।
सदाशय नाथः, सुरेश्वर रामः ॥

१५-ऽ।।।ऽऽ दुस्तर भवाब्धेः, संतरण सेतुः ।
पातु सकलाधेः, भानु कुल केतुः ॥

१६-।।।।ऽऽ अहमति दीनः, शरण मुपेतः ।
नय भव सिन्धो, रघुवर पारम् ॥

१७-ऽऽऽऽ।ऽ कौसल्या नन्दनः, साक्षाद् विष्णुःस्मृतः ।
लोकाध्यक्षः प्रभुः, सोऽव्याल्लोकान् सदा ॥

१८-।ऽऽऽ।ऽ चिदानन्दात्मको, जगद् धाता प्रभुः ।
त्रिलोकीं त्रायता, मधर्मं चास्यतु ॥

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गायत्री

१९-ऽ।ऽऽ।ऽ राम भद्रः प्रभुः, सज्जनानन्ददः ।
आशुदद्याच्छिवं, साधु रक्षाकरः ।।

२०-।।ऽऽ।ऽ स सतां पालको, रघुनाथः सदा ।
सकलाभीष्टदः, सुजनान् रक्षतात् ।।

२१-ऽऽ।ऽ।ऽ रक्षः कुलानलः, श्रीमान् जनेश्वरः ।
भक्ताभय प्रदः, पायाद् भवार्णवात् ।।

२२-।ऽ।ऽ।ऽ प्रपन्न पालकः, सतां सहायकः ।
अघौघ पीडितान्, रघूत्तमोऽवतात् ।।

२३-ऽ।।ऽ।ऽ मित्र प्रपालक, शत्रु निषूदन ।
आशु समुद्धर, मामपि राघव ।।

२४-।।।ऽ।ऽ कमल लोचन, व्यसन मोचन ।
शरण मागतं, सदय मुद्धर ।।

२५-ऽऽऽ।।ऽ दीनानाथ हितः, कौशल्या तनयः ।
सन्तापं हरताद् - नित्यं राम शशी ।।

२६-।ऽऽ।।ऽ विधाता जगतां, निहन्ता विपदाम् ।
जनानां मनसि, स रामो रमताम् ।।

२७-ऽ।ऽ।।ऽ श्रेयसां निलयः, कोसलाधिपतिः ।
संकटं हरतात्, सम्मदं दिशतात् ।।

२८-।।ऽ।।ऽ नियतं सुकृतं, करवै सततम् ।
जगदीश्वर मे, हरताद् दुरितम् ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गायत्री

२९-ऽऽ।।।ऽ श्रीराम दुरितं, भक्तस्य हरतात् ।
संसार जलधेः, पारं गमयतात् ।।

३०-।ऽ।।।ऽ भवाब्धि पतितं, समुद्धरतु माम् ।
प्रभो मनसि मे, सदा विहरतात् ।।

३१-ऽ।।।।ऽ राघव सुजनं, पालय सततम् ।
वर्धय सुकृतं, नाशय दुरितम् ।।

३२-।।।।।ऽ अवतु सुजनं हरतु दुरितम् ।
जगति जयताद्, रघुकुलमणिः ।।

३३-ऽऽऽऽऽ। लोक स्वामिन् राम, सर्वाँल्लोकान् पाहि ।
संसाराब्धे रक्ष, त्वं त्राता सर्वस्य ।।

३४-।ऽऽऽऽ। शरण्य श्रीराम, प्रभो मां संरक्ष ।
सताँ सिद्धिं यच्छ, जनांस्त्रायस्वाशु ।।

३५-ऽ।ऽऽऽ। राम सर्वज्ञोऽसि, हृद्गतं जानासि ।
त्वं महोदारोऽसि, देह्यभीष्टं मेऽपि ।।

३६-।।ऽऽऽ। जय सीतानाथ, हृदये वर्तस्व ।
भव बन्धं छिन्धि, कृपया मां पाहि ।।

३७-ऽऽ।ऽऽ। त्रैलोक्य नाथाय, लोकाभिरामाय ।
सीता समेताय, नित्यं नमोमेऽस्तु ।।

३८-।ऽ।ऽऽ। प्रपन्न पालाय, सदा प्रसन्नाय ।
महानुभावाय, नमो महेशाय ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गायत्री

३९-ऽ।।ऽऽ। लोकप लोकस्य, नाशय दुःखानि ।
भञ्जय पापानि, वर्धय पुण्यानि ।।

४०-।।।ऽऽ। वितर भद्राणि, वितनु हृद्यानि ।
निजहि रक्षांसि, जगदधीक्षान ।।

४१-ऽऽऽ।ऽ। श्रीरामः सदैव, भक्तानां शुभाय ।
दुष्टानां क्षणेन, संहारं करोति ।।

४२-।ऽऽ।ऽ। त्रिलोकाधिपाय, सतां पालकाय ।
रघूणां वराय, सुधाम्ने नमोऽस्तु ।।

४३-ऽ।ऽ।ऽ। ताप हेतु माशु, जन्मबन्ध मस्य ।
हे प्रभो दयस्व, राघवेन्द्र पाहि ।।

४४-।।ऽ।ऽ। सततं दयस्व, सुमुखो जनेषु ।
परि पाहि राम, रमतां मनःसु ।।

४५-ऽऽ।।ऽ। भक्त प्रिय राम, मामुद्धर नाथ ।
पापादभि रक्ष, धर्मे रुचिरस्तु ।।

४६-।ऽ।।ऽ। प्रभो परिपाहि, शरण्य रमेश ।
निजेषु जनेषु, सदैव दयस्व ।।

४७-ऽ।।।ऽ। हे विबुध वन्द्य, दीन जन-नाथ ।
पालय दयस्व, मां जगदधीश ।।

४८-।।।।ऽ। त्रिभुवन नाथ, यति-मुनि-गम्य ।
अव जन माशु, नृवर प्रसीद ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गायत्री

४९-ऽऽऽऽ।। त्रैलोक्याधीश्वर, कौसल्यानन्दन ।
दीनानभ्युद्धर, भक्तान् संवर्धय ।।

५०-।ऽऽऽ।। त्रिलोकी पालक, विपन्नानुद्धर ।
अघौघान् नाशय, दीनानाथा नव ।।

५१-ऽ।ऽऽ।। राम पापं हर, स्वामिधर्मं चर ।
धर्म्यं मार्गं नय, सर्व लोका नव ।।

५२-।।ऽऽ।। जगतां पालक, भव बन्धं हर ।
तमसो वारय, प्रतिभा मेधय ।।

५३-ऽऽ।ऽ।। मोहं विनाशय, बोधं प्रकाशय ।
पापाद् वारय, धर्मं समेधय ।।

५४-।ऽ।ऽ।। प्रसीद राघव, दयस्व लोकप ।
तमो विनाशय, मुदं प्रवर्धय ।।

५५-ऽ।।ऽ।। मोह मपाकुरु, राघव पालय ।
कर्मणि प्रेरय, शर्म समेधय ।।

५६-।।।ऽ।। अमर - रक्षक, दनुज–घातक ।
प्रणत पालक, जय जनावक ।।

५७-ऽऽऽ।।। कौशल्या तनय, सीतानाथ जय ।
मर्यादा पुरुष, शोकं मे शमय ।।

५८-।ऽऽ।।। जनानुन्नमय, स्व भक्तान् रमय ।
स्व–रूपं गमय, ममाधिं शमय ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गायत्री

५९-ऽ।ऽ।।। शार्ङ्गचापधर, देव–कार्य–कर ।
दीन दुःख हर, शत्रु–जीव हर ।।

लोक शोक हर, दास मोद कर ।
भक्त भीति हर, राम विश्व भव ।।शुभम्

६०-।।ऽ।।। जन ताप हर, भव भीरु भव ।
रमया सहित, हृदये विहर ।।

६१-ऽऽ।।।। श्रीमन् नटवर, नित्यं जय जय ।
पापं परिहर, प्रज्ञा मुपनय ।।

६२-।ऽ।।।। अघान्यपनय, प्रभो रघुवर ।
सदा जनभव, मुदा मुपनय ।।

६३-ऽ।।।।। लोक–सुखकर, शोकमपहर ।
राम हृदिशय, पाप मपनय ।।

६४-।।।।।। जगदघहर, जय रघुवर ।
जन भरभव, मनसि विहर ।।

— ● —

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उष्णिक्

१-ऽऽऽऽऽऽऽ नित्यं वन्दे श्रीरामं, लोकाधीशं सर्वज्ञम् ।
सीतानाथं शत्रुघ्नं, विश्वामित्राल्लब्धास्त्रम् ।।

२-।ऽऽऽऽऽऽ महोदारः श्रीरामः, सदा पायाद् दीनार्तान् ।
भवाब्धेः पारंनीयात्, स सच्चिद् रूपानन्दः ।।

३-ऽ।ऽऽऽऽऽ हे प्रभो मां त्रायस्व, त्वं महोदारः स्वामी ।
उद् विजेऽहं संसाराद्, जन्म-बन्धं मे छिन्धि ।।

४-।।ऽऽऽऽऽ कृपया भक्ताभीष्टं, दिशतान्नित्यं रामः ।
दयतां लोकाध्यक्षः, समदर्शी भूतेषु ।।

५-ऽऽ।ऽऽऽऽ मातुः प्रियं कर्तुं यो, राज्याभिषेकं त्यक्त्वा ।
अध्यूषिवान् कान्तारं, सौमित्रि-सीता युक्तः ।।

६-।ऽ।ऽऽऽऽ सुरेन्द्र वृन्दैर्वन्द्यो, योगीश्वरै र्निध्येयः ।
धृतावतारोलोके, स पातु सर्वाँल्लोकान् ।।

७-ऽ।।ऽऽऽऽ रक्षतु नित्यं धर्मं, कोसल राजो रामः ।
यः पितु राज्ञाकारी, हन्त चचारारण्यम् ।।

८-।।।ऽऽऽऽ दनुज शत्रू रामः, त्रिदश कार्यं कर्तुम् ।
अवततार स्वर्गाद्, अवनिभारं हर्तुम् ।।

९-ऽऽऽ।ऽऽऽ त्रैलोक्यस्य पातालं, कौसल्या सुतोरामः ।
भक्तानां हितं कर्तुं, भूलोकेऽकरोल्लीलाम् ।।

१०-।ऽऽ।ऽऽऽ शरण्यः प्रपन्नानां, जनानां समुद्धर्ता ।
सदाव्यात् सदीनार्तान्, विभुर्जानकीनाथः ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उष्णिक्

११-ऽ।ऽ।ऽऽऽ बालिनं निहत्यारं, प्रत्यपात् स सुग्रीवम् ।
मित्रतां व्यधात् सत्यां, प्रत्यपादि चादर्शम् ॥

१२-।।ऽ।ऽऽऽ जगदीश्वरो रामो, भुवि धर्म रक्षार्थम् ।
असतां सदा नाशं, कुरुते सतां श्रेयः ॥

१३-ऽऽ।।ऽऽऽ सुग्रीवसखः प्रायाद्, लङ्कां रिपुनाशार्थम् ।
हत्वा रिपु मानैषीत्, सीतामकलङ्कां सः ॥

१४-।ऽ।।ऽऽऽ विभीषण मात्माभं, चकार स लङ्केशम् ।
उदारतया रामः, सदैव शरण्यो हि ॥

१५-ऽ।।।ऽऽऽ राम हर संतापं, त्वां शरण मायातः ।
छिन्धि भवबन्धं मे, त्वं ननु दया सिन्धुः ॥

१६-।।।।ऽऽऽ सुर गण कार्यार्थे, प्रतिपल मायुक्तः ।
अशरण-धाता त्वं, दिति–सुत संहर्ता ॥

१७-ऽऽऽऽ।ऽऽ कौसल्यानन्द दाता, साधूनां त्राण हेतोः ।
दैत्यानां गर्वशान्त्यै, प्रादुर्भूतो जगत्याम् ॥

१८-।ऽऽऽ।ऽऽ गुरु प्रीत्यै ससीतः, स सौमित्रिः सहर्षम् ।
महारण्ये स रामः, प्रवासं स्वीचकार ॥

१९-ऽ।ऽऽ।ऽऽ मित्र कार्यं विधातुं, यो हि तीर्णप्रतिज्ञः ।
साधु-रक्षा-विधाता, राघवः सोऽवतान्माम् ॥

२०-।।ऽऽ।ऽऽ जलधौ सेतुमार्गं, विरचय्याप लङ्काम् ।
हतवान् रावणं तं, मम बन्धं स भिद्यात् ॥

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उष्णिक्

२१-ऽऽ।ऽ।ऽऽ अह्नाय सं बिभर्ति, रूपाण्यनेकधा यः ।
धर्मस्य रक्षणार्थं, नाशाय दुर्जनानाम् ॥

२२-।ऽ।ऽ।ऽऽ स लक्ष्मणः स सीतः, पितुर्वचो विधातुम् ।
अरण्यमध्युवास, जगद्धिताय रामः ॥

२३-ऽ।।ऽ।ऽऽ मानव–लोक–पाल, दानव वंश दाव ।
राघव रक्ष धर्मं, पालय सर्वं दीनान् ॥

२४-।।।ऽ।ऽऽ असुर नाशनाय, सुजन पालनाय ।
रघुवरेहि भूयो, व्यपनयाश्वधर्मम् ॥

२५-ऽऽऽ।।ऽऽ मारीचोमृगरूपः, सीतायाः पुरतोऽयात् ।
रामो वञ्चकमेतं, वाणेनाशु जघान ॥

२६-।ऽऽ।।ऽऽ मुनीनां परित्राणं, व्यधात् कानन वासे ।
प्रपेदे निज धर्मं, प्रबुद्धः स हि रामः ॥

२७-ऽ।ऽ।।ऽऽ सीतया सह राम, श्चित्रकूट मुपायात् ।
पालयन् पितु राज्ञा, मन्वभूत् सुचिरं शम् ॥

२८-।।ऽ।।ऽऽ मुनिभिः सह वासं, विदधेस ससीतः ।
अनुजेन सपर्यां, विहिता मुपगृह्णन् ॥

२९-ऽऽ।।।ऽऽ रामोऽनुज समेतः, चक्रे वन मभीति ।
हत्वा दनुज वृन्द, मार्तानभि ररक्ष ॥

३०-।ऽ।।।ऽऽ सुधीजन सुसेवी, निशाचर निहन्ता ।
स्वधर्म परिरक्षी, सदा जयति रामः ॥

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उष्णिक्

३१-ऽ।।।।ऽऽ कौशिक मुनि शिष्यः, सर्व सुजन-धाता ।
अप्रतिभट वीरः, राजति भुवि रामः ।।

३२-।।।।।ऽऽ सुर मुनि हितैषी, गुरुजन सुसेवी ।
अवध-वसु रामः, सहि जगदीशः ।।

३३-ऽऽऽऽऽ।ऽ सर्वज्ञस्त्वं हे प्रभो, दीनानाथान् रक्षसि ।
अत्यार्तोहं साम्प्रतं, कञ्जाक्षः किं नेक्षसे ? ।।

३४-।ऽऽऽऽ।ऽ सहस्रं यो रक्षसां, जघानैकः संगरे ।
महावीरो विष्टपे, न रामादन्यः श्रुतः ।।

३५-ऽ।ऽऽऽ।ऽ रावणं हत्वा प्रभुः, सीतया साकं मुदा ।
स्वां पुरीं संप्रस्थितो, युद्ध मित्रैः संयुतः ।।

३६-।।ऽऽऽ।ऽ भरतो भ्रातुः पुरः, शिरसा नत्वा ब्रवीत् ।
प्रति गन्तुं स्वां पुरीं, प्रतिपत्तुं स्वासनम् ।।

३७-ऽऽ।ऽऽ।ऽ राज्ञोवचः पालयन्, मेने न कर्तुं तथा ।
रामोऽनुनीयानुजं, सप्रश्रयं प्राहिणोत् ।।

३८-।ऽ।ऽऽ।ऽ वनं गते राघवे, स पुत्र शोकातुरः ।
लपन् मुहू रामैहा, सुतेति नाकं ययौ ।।

३९-ऽ।।ऽऽ।ऽ पुण्य जला जाह्नवी, कल्मष विध्वंसिनी ।
विष्णु पदान्निर्गता, त्र्यम्बक संमानिता ।।

४०-।।।ऽऽ।ऽ अखिल लोक प्रभुः व्यसन हारी हरिः ।
विबुध वन्द्यो विभुः जयति रामः सदा ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उष्णिक्

४१-ऽऽऽ।ऽ।ऽ भक्ताभीष्ट दायकः, दीनानाथ पालकः ।
गीर्वाणप्रियः सदा, पायान्मां भवाब्धि तः ।।

४२-।ऽऽ।ऽ।ऽ विपन्नं मनोऽरिभिः, नितान्तं कलेरघैः ।
निमग्नं भवाम्बुधौ, परित्रायतां हरिः ।।

४३-ऽ।ऽ।ऽ।ऽ जन्म मृत्यु दुःखितं, मामघौघ पीडितम् ।
पाहि पामरं प्रभो, त्वं हि लोक रक्षकः ।।

४४-।।ऽ।ऽ।ऽ अवशोऽस्मि दुखितः, भव रोग पीडितः ।
विदितोऽसि रक्षकः, कृपयाशु पाहि माम् ।।

४५-ऽऽ।।ऽ।ऽ विश्वम्भर पाहि मां, पापैः परिपीडितम् ।
श्रेयो वितराशु मे, त्वं सर्व प्रपालकः ।।

४६-।ऽ।।ऽ।ऽ सदा प्रिय दर्शनः, प्रपन्नशुभप्रदः ।
परः शुभलक्षणो, जनप्रिय राघवः ।।

४७-ऽ।।।ऽ।ऽ दुष्ट जन घातकः, साधु जन पालकः ।
सर्व वसु दायकः, मामवतु राघवः ।।

४८-।।।।ऽ।ऽ भव भय वारकः, जन हित कारकः ।
कपि पति पालकः अवतु स राघवः ।।

४९-ऽऽऽऽ।। हित्वा कामानखिलान्, संसाराब्धि तरितुम् ।
श्रीरामं भक्त हितं, लोकाध्यक्षं भजत ।।

५०-।ऽऽऽ।।ऽ विमुक्त्यै निर्विषयं, मनो धार्यं मनुजाः ।
तदर्थं योजयत, प्रभोः पादाब्ज युगे ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उष्णिक्

५१-ऽ।ऽऽ।।ऽ मैथिली शोधकृते, प्रेषयामास हरीन् ।
अङ्गदादींश्चतुरो, वानराणामधिपः ।।

५२-।।ऽऽ।।ऽ उपकूलं जलधे, रभियाता हरयः ।
अवसेदुः सकलाः, परतीरं व्रजितुम् ।।

५३-ऽऽ।ऽ।।ऽ ऋक्षेश जाम्बवता, संस्मारितो हनुमान् ।
उल्लङ्घ्यनीरनिधिं, लङ्कां गतः सहसा ।।

५४-।ऽ।ऽ।।ऽ विचित्य तामखिलां, पुरीमशोक वने ।
ददर्श राम प्रियां, वियोग शोक कृशाम् ।।

५५-ऽ।।ऽ।।ऽ तामभिवीक्ष्य कपिः, प्रास्तुत राम कथाम् ।
सा निशमय्य वचः, प्राप मुदं नितराम् ।।

५६-।।।ऽ।।ऽ सकल ताप हरः, सुजन मोद करः ।
विदित शार्ङ्ग धरः, रघु पतिर्जयतात् ।।

५७-ऽऽऽ।।।ऽ साधूनां हित करः, दुर्वृत्त प्रशमनः ।
आर्तानामभय प्रदः – श्रीरामो विजयताम् ।।

५८-।ऽऽ।।।ऽ दयालू रघुपतिः, सदा सज्जन हितः ।
त्रिलोकी पतिरसौ, प्रमोदाय भवतात् ।।

५९-ऽ।ऽ।।।ऽ योगिनां हृदिशयः, प्राणिनामभयदः ।
दुःखिना मघहरः, त्रायतां रघुवरः ।।

६०-।।ऽ।।।ऽ जननी हितकरम्, दुरितक्षय करम् ।
भवसिन्धु तरणिम्, भजतादि पुरुषम् ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उष्णिक्

६१-ऽऽ।।।।ऽ रामो भवभय हृद्, नित्यं जन सुखदः ।
पायाद् दुरित हरो, लोकाभय निरतः ।।

६२-।ऽ।।।।ऽ अधर्म निरसनः सदा सुजन हितः ।
जनानवतु विभुः, भवाम्बुधि तरणिः ।।

६३-ऽ।।।।।ऽ नन्दतु रघुपतिः, लोकपति रवतात् ।
राम पद कमले, योजय निज मनः ।।

आर्त भयशमनः, मङ्गलमय वपुः ।
पाति सुकृतिजनान्, शश्वदवध पतिः ।।

श्री रघु परि वृढो, दीन जन मवतात् ।
यत् स प्रकृतिमृदुः संसृति मुपहतात् ।। विशेषकम्

६४-।।।।।।ऽ दशरथ तनयः, भव जलधि तरीः ।
स हि जगदवति, सृजति हरति च ।।

६५-ऽऽऽऽऽऽ। लोकान् सर्वान् यः पाति, विश्वं विश्वंव्याप्नोति ।
उद्धर्तुं धर्मं सोऽत्र, नैकं रूपं गृह्णाति ।।

६६-।ऽऽऽऽऽ। शरण्यो यः ख्यातोऽस्ति, त्रिलोकी नाथः सोऽत्र ।
निरस्याधिं व्याधिं च, सदा देयात् भद्राणि ।।

६७-ऽ।ऽऽऽऽ। प्राणिनां कल्याणाय, संततं यो जागर्ति ।
दीनबन्धुर्लोकेषु, सोऽस्तु योगक्षेमाय ।।

६८-।।ऽऽऽऽ। शरणं मे रामोऽस्ति, स सदा लोकान् पाति ।
अवधेशो भक्तेषु, कृपया देयाच्छर्म ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उष्णिक्

६९-ऽऽ।ऽऽऽ। रामेण तुल्यो नास्ति, वीर स्त्रिलोक्यां कोऽपि ।
एकोऽबधीद् रक्षांसि, लोक व्यथा कारीणि ।।

७०।ऽ।ऽऽऽ। अहेतुकं प्रीणाति, सदैव यो दीनेषु ।
त्रिलोकनाथः पातु, स सत्य सन्धो मापि ।।

७१-ऽ।।ऽऽऽ। यो दयते दीनेषु, वारयति दुःखानि ।
चेतयते भूतानि, सोऽवतु मां कृच्छ्रेषु ।।

७२-।।।ऽऽऽ। अति मनोहारीणि, विकसितान्यब्जानि ।
इह ऋतौराजन्ति, विविधवर्णान्यङ्ग ।।

७३-ऽऽऽ।ऽऽ राजीवान्यनेकानि, कासारेषु राजन्ति ।
आस्वाद्याब्ज वीजानि, हंसास्तत्र कूजन्ति ।।

७४-।ऽऽ।ऽऽ। अपङ्कानि वर्त्मानि, सु संचार योग्यानि ।
अति स्वच्छ तोयानि, सराँस्यत्र राजन्ति ।।

७५-ऽ।ऽ।ऽऽ। जन्म मृत्यु दुःखानि, दूरयाशु त्रायस्व ।
राम मां निरीक्षस्व, त्वं दीन नाथोऽसि ।।

७६-।।ऽ।ऽऽ। कृपया वलम्वस्व, जगदीश मां पाहि ।
शरणं प्रपन्नोऽस्मि, सततं दयां धेहि ।।

७७-ऽऽ।।ऽऽ। रामो जगदीशोऽति, लोकाम खिलाम् पाति ।
नाथं शरणं याहि, श्रेयस्तव जायेत ।।

७८-।ऽ।।ऽऽ। शिला चरणस्पर्श, मवाप्य बभौयस्य ।
क्षणात सुरयोषेव, स मां सततं पातु ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उष्णिक्

७९-ऽ।।।ऽऽ। गौतम बधूः सा हि, द्राक् शुभगतिं प्राप ।
विष्टपतले कोऽपि, तादृश उदारो न ।।

८०-।।।,ऽऽ। स्मृतिमुपयातोहि, स हरति पापानि ।
सफलयितुं जन्म, तमनु पलं ध्याय ।।

८१-ऽऽऽऽ।ऽ। अन्तः शत्रून् विधूय, योगीन्द्रै र्ध्यायतेऽत्र ।
विश्वं व्याप्य स्थितश्च, सर्वेशं तं भजस्व ।।

८२-।ऽऽऽ।ऽ। इदं सर्वं विभाति, जगद् भासैव तस्य ।
जन–श्रेय स्तनोति, नमस्तस्मै सदैव ।।

८३-ऽ।ऽऽ।ऽ। पूरयोध्या परैव, राजधानी विभाति ।
'घाघरा' मन्वगत्र, मानवेन्द्रै र्न्यवेशि ।।

८४-।।ऽऽ।ऽ। अमराणां पुरीव, भुवि भासा चकास्ति ।
प्रथमा पूर्व्यधायि, नगरीणा मजेन ।।

८५-ऽऽ।ऽ।ऽ। राजा तु राम एव, लोके पुरा बभूव ।
राज्ये तु तस्य कोऽपि, सन्ताप माप नैव ।।

८६-।ऽ।ऽ।ऽ। न कोऽपि तापमाप, न तस्करो बभूव ।
स्वधर्म पालकास्तु, नरोऽवसन् सुखेन ।।

८७-ऽ।।ऽ।ऽ। संसृति पीडितोऽस्मि, लोकपते प्रसीद ।
नाशय जन्म बन्ध, मात्मनि वर्तयाशु ।।

८८-।।।ऽ।ऽ। त्रिभुवनाधिनाथ, शमयतादघानि ।
शरण मागतोऽस्मि, मनसि मे रमस्व ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उष्णिक्

८९-ऽऽऽऽ।ऽ। कौसल्या सुत राम, सद् वृन्दावन दक्ष ।
भक्तापत्ति विराम, पापौघादभिरक्ष ।।

९०-।ऽऽ।।ऽ। जनानां भरणाय, सतामुद्धरणाय ।
अधर्मापनयाय, स लोकं प्रतियाति ।।

९१-ऽ।ऽ।।ऽ। कौशलेश दयस्व, पाहि माशुरमेश ।
संसृतिं मम भिन्धि, दीननाथ प्रसीद ।।

९२-।।ऽ।।ऽ। शरणं जन नाथ, जगतामसि राम ।
जनता परिताप, मप यापय साधु ।।

९३-ऽऽ।।।ऽ। विश्वं स परि पाति, जागर्ति च हिताय ।
लोकाधि पति रस्ति, यो मे शरण मत्र ।।

९४-।ऽ।।।ऽ। प्रसीदति जनेषु, तमो हरति यश्च ।
प्रभुर्जगत आशु, करोतु स शुभानि ।।

९५-ऽ।।।।ऽ। मामव जगदीश, त्वां शरण मुपैमि ।
जन्म भय मपैतु, राम मयि प्रसीद ।।

९६-।।।।।ऽ। जय भुवननाथ, त्वरित मवधेहि ।
हर जगदधानि, प्रवितर सुखानि ।।

९७-ऽऽऽऽऽ।। दीनान् सर्वान् पालय, दोषान् रोगान् वारय ।
अन्तः शत्रूँस्तापय, सर्वान्तर्यामिञ्जय ।।

९८-।ऽऽऽऽ।। पुनर्जन्माघादव, मृतेःपाशान् मोचय ।
प्रभो मोहं नाशय, विशोकं स्वान्तं कुरु ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उष्णिक्

९९-ऽ।ऽऽऽ।। राघव मामुद्धर, नाथ दीनान् पालय ।
साधु साधूनुन्नय, शोकमोहौ नाशय ।।

१००-।।ऽऽऽ।। अखिलात्मक राघव, जनता-जाड्यं हर ।
भुवि धर्मं वर्धय, व्यसनं मे संहर ।।

१०१-ऽऽ।ऽऽ।। त्रैलोक्य बन्धो जय, दीनाननाथा नव ।
संसार दुःखं हर, ज्ञान-प्रकाशं कुरु ।।

१०२-।ऽ।ऽऽ।। अघौघ माशु हर, मनो विशुद्धं कुरु ।
शुभे रुचिं संतनु, प्रसीद लीला धर ।।

१०३-ऽ।।ऽऽ।। राम विशोकं कुरु, धर्मं रुचिं वर्धय ।
त्वं शरणं मे ननु, नाशय पापं मम ।।

१०४-।।।ऽऽ।। विहर चित्ते मम, वितर दृष्टिं मयि ।
सपदि तापं हर, जनमशोकं कुरु ।।

१०५-ऽऽऽ।ऽ।। पापेभ्यो निवारय, नित्यानन्द मावह ।
अन्तर्मे विशोधय, स्वात्मानं प्रदर्शय ।।

१०६-।ऽऽ।ऽ।। विभुर्यो विराजति, स भूतानि रक्षति ।
स सर्वेषु तिष्ठति, सचिन्त्यो निजात्मनि ।।

१०७-ऽ।ऽ।ऽ।। लोकनाथ लोकप, पाहि भक्त वत्सल ।
उद्धराशु राघव, त्वं हि पालको मम ।।

१०८-।।ऽ।ऽ।। अवधेहि राघव, शरणं प्रभो मम ।
अघमाशु नाशय, भवबन्ध मस्य च ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उष्णिक्

१०९-ऽऽ।।ऽ।। धर्माचरणं कुरु, पापानि परित्यज ।
इत्थं सफला तव, जातिर्भुवि मानव ।।

११०-।ऽ।।ऽ।। परोपकृतिं चर, हरौ निरतो भव ।
मनोरथ मुत्सृज, भवाम्बुधि मुत्तर ।।

१११-ऽ।।।ऽ।। राघव दयां तनु दीन जनता मव ।
पाप मपनाशय, धर्म सुख मावह ।।

११२-।।।।ऽ।। व्यसनम पाकुरु, मनसि हरिं स्मर ।
हरि तरि माश्रय, भव जलधिं तर ।।

११३-ऽऽऽऽ।।। ज्ञानान् मुक्तिर्भवति, योगो ज्ञानं दिशति ।
योगः साम्यं जगति, तत्त्वं ज्ञात्वा तरति ।।

११४-।ऽऽऽ।।। रुचिः कार्या यशसि, महासक्ति स्तपसि ।
सदा चिन्त्यं रहसि, हरिर्ध्येयो मनसि ।।

११५-ऽ।ऽऽ।।। पूर्ण चन्द्रो नभसि, स्वान्मयूखान् किरति ।
लोक तापं हरति, रोचतेऽसौ शरदि ।।

११६-।।ऽऽ।।। अहितान् नाशयति, सुजनान् पालयति ।
अवधेशो जगति, सुधियो मोदयति ।।

११७-ऽऽ।ऽ।।। संचिन्तितो रहसि, स्वान्तं विनोदयति ।
पापानि दूरयति, रामः सदा सपदि ।।

११८-।ऽ।ऽ।।। अघानि यो हरति, शुभानि वर्धयति ।
अगोचरो जगति, स्मरामि तं मनसि ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उष्णिक्

११९-ऽ।।ऽ।।। विश्व मिदं सृजति, रक्षति संहरति ।
यश्च विभासयति, तं मनुजा ! नमत ।।

१२०-।।।ऽ।।। जगदिदं सृजति, हरति रक्षति च ।
भुवननाथ मिह, सपदि तं नमत ।।

१२१-ऽऽऽ।।।। कामान् मे प्रशमय, मृत्योर्मामरमव ।
पापेभ्यो विरमय, संसारं विरहय ।।

१२२-।ऽऽ।।।। अघं मे न गणय, प्रदत्तान् मति मति ।
मनः शंनय, कुरु, निवासं मम हृदि ।।

१२३-ऽ।ऽ।।।। मानसे मम वस, संसृतिं व्यपनय ।
सन्मतिं विगमय, हे हरे जय जय ।।

१२४-।।ऽ।।।। मम ताप मप हर, जडता मपनय ।
मुदितां प्रकटय, जयताद् रघुवर ।।

१२५-ऽऽ।।।।। मोहं मम शमय, प्रज्ञामधिगमय ।
संसार मपनय, मां पाहि रघुवर ।।

१२६-।ऽ।।।।। त्रिलोक परिवृढ, प्रसीद नटवर ।
प्रभो विहर हृदि, हरे सतत मव ।।

१२७ऽ।।।।। हे जगदघहर, सज्जन सुखकर ।
ईश विहर हृदि, मङ्गल मुपहर ।।

१२८-।।।।।। सुजन सुखकर, सतत सहृदय ।
दशरथ तनय, नृवर जगदव ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

१-ऽऽऽऽऽऽऽऽ लोकाध्यक्षो धर्मत्राता, शत्रुघ्नो मर्यादादर्शः ।
आपद् बन्धुः सर्वाभिज्ञो, मोदं दिश्याद्राजारामः ॥

२।ऽऽऽऽऽऽऽऽ अयोध्यानाथः सर्वज्ञ, श्चिदानन्दो दिव्य ज्योतिः ।
महेष्वासः साक्षाद् विष्णुः, प्रदिश्यात् कर्म श्रेयांसि ॥

३-ऽ।ऽऽऽऽऽऽ यः समाधौ योगि ध्येयः, भक्तिवश्यः प्रत्यक्षं सः ।
विद्यते लोके सर्वत्र, चेतसा नित्यं संस्मार्यः ॥

४-।।ऽऽऽऽऽऽ जगदीशः सीतानाथः, समदर्शी सर्व व्यापी ।
भवसिन्धोः पारं गन्तुं समुपास्यो नित्यं लोकैः ॥

५-ऽऽ।ऽऽऽऽऽ आपात रम्याः संभोगाः, सक्तिर्न कार्या भोगेषु ।
संसार मूलं व्यासङ्गः तस्माद् विरक्तिर्मोक्षाय ॥

६-।ऽ।ऽऽऽऽऽ भवाब्धि-पारं मां नेतुम्, प्रसीद सर्वान्तर्यामिन् ।
भृशमहं संविग्नोऽस्मि, शरीर बन्धो मे माभूत् ॥

७-ऽ।।ऽऽऽऽऽ एष भवो निद्रारूपः, यत्र न सुप्ता बुध्यन्ते ।
जागृहि चेतो निद्रातः, भाग्यवशाद् निद्राभङ्गः ॥

८-।।।ऽऽऽऽऽ मनसि सन्तोषः कार्यः, रहसि तत्त्वं संचिन्त्यम् ।
तपसि कर्तव्या श्रद्धा, यशसि लिप्सा संधार्या ॥

९-ऽऽऽ।ऽऽऽऽ सन्तोषो निधिः साधूनां, संसाराद् विरक्तिस्तेषाम् ।
प्राणानां विशुद्धा वृत्तिः आलप्या न निन्दान्येषाम् ॥

१०-।ऽऽ।ऽऽऽऽ परेषां न पीडा कार्या, महा पाप माहुः पीडाम् ।
यथा शक्ति लोकैर्लोके, समेषां हितं कर्तव्यम् ॥

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

११-ऽ।ऽ।ऽऽऽऽ सीतया समेतो रामः, मानसे ममास्तां नित्यम् ।
मोह पाश माशुच्छिद्यात्, देहबन्ध मस्यान्नाथः ॥

१२ऽ।।ऽ।ऽऽऽऽ जगती तले क्षेमाय, मनुजैरुपास्यो रामः ।
स हि लोकनाथः श्रीमान्, दयतेतरा मह्नाय ॥

१३-ऽऽ।।ऽऽऽऽ सर्वैरपि चेयो धर्मः, कार्या स्वमतिर्ना धर्मे ।
जेयं मन आर्यैः शश्वद्, ध्येयो हृदि रामः सद्भिः ॥

१४-।ऽ।।ऽऽऽऽ परोपकृतिः कर्तव्या, कदापि न पापं कार्यम् ।
जनै स्तरितुं संसारं, सदा हरि भक्तिः कर्तव्या ॥

१५-ऽ।।।ऽऽऽऽ उद्धर भवाब्धेराशु, राम मयि दृष्टि धेहि ।
सन्तत महं सीदामि, त्वं शरण मापन्नानाम् ॥

१६-।।।।ऽऽऽऽ परम दयालो राम, शरण मसि त्वं नाथ ।
अपहर पापान्याशु, मनसि निवासं धेहि ॥

१७-ऽऽऽऽ।ऽऽऽ आपन्नार्ति प्रभोऽपास्य, दीनेऽनाथे प्रसीदाशु ।
त्वं सर्वज्ञोऽसि विश्वात्मन् सर्वान् कामान् सदा यच्छ ॥

१८-।ऽऽऽ।ऽऽऽ प्रभो मोहान्धकारं मे, निराकुर्पाः प्रसीदाशु ।
दयालुस्त्वं प्रतीतोऽसि, भवाम्भोधौ निमग्नोऽस्मि ॥

१९-ऽ।ऽऽ।ऽऽऽ मानसे राजतां नित्यं, सीतया शोभितो रामः ।
सम्प्रसादं सदा कुर्यात्, पूरयेदाशु मे कामान् ॥

२०-।।ऽऽ।ऽऽऽ पितु राज्ञां मुदा रक्षन्, वनमध्युष्य दुर्वृत्तान् ।
हतवान् राक्षसानेको, भव बन्धं स मे छिद्यात् ॥

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

२१-ऽऽ।ऽ।ऽऽऽ संसार नीरधौ मग्नं, राजीव लोचनः पातु ।
दूरी करोतु पापानि, श्रेयस्तनोतु भूयिष्ठम् ॥

२२-।ऽ।ऽ।ऽऽऽ अपास्य सर्व पापानि, दयस्व दीन जीवेषु ।
प्रभो प्रसीद विश्वात्मन्, समुद्धराशु भूतानि ॥

२३-ऽ।।ऽ।ऽऽऽ पालय सर्व सत्वानि, नाशय जीव दुःखानि ।
ताप मपास्य भक्तानां, राघव देहि भद्राणि ॥

२४-।।।ऽ।ऽऽऽ शमय ताप मह्नाय, विहर मानसे राम ।
वितर सन्मतिं नाथ, प्रतनु शान्तिमन्तर्ये ॥

२५-ऽऽऽ।।ऽऽऽ अन्तः शोक मपाकृत्य, मोदं मे दिशताद् राम ।
अश्रान्तं मयि जागर्तु, विज्ञानं भगवद् रूपम् ॥

२६-।ऽऽ।।ऽऽऽ जगन्नाथ भवेच्छश्वत् समत्वं मम सर्वत्र ।
चिदानन्दमयं ब्रह्म, स्मरेयं हृदि तल्लीनः ॥

२७-ऽ।ऽ।।ऽऽऽ पातकानि निराकुर्याद्, भावयेद् हृदयं शुद्धम् ।
मानसे विहरेद् रामो, मोचयेन्मम संसारम् ॥

२८-।।ऽ।।ऽऽऽ अवधेशमहं वन्दे, हृदयस्थित मात्मानम् ।
सकलाभीष्ट दातारं शरणं जगतां नित्यम् ॥

२९-ऽऽ।।।ऽऽऽ प्रत्यर्थि प्रति हन्तारं, भक्तार्तिहर मारव्यातम् ।
विष्णुं नमत रामाख्यं, लोका ! हृदय आसीनम् ॥

३०-।ऽ।।।ऽऽऽ विहाय सकलान् कामान्, हरिं भजत रामाह्वम् ।
सुदुर्लभमिदं लोका ! विधत्त सफलं जन्म ॥

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

३१-ऽ।।।।ऽऽऽ मानस सरसी हंसः, साधु विहरतां रामः ।
पूरयतु जनाभीष्टं, कश्मलक मपा कुर्यात् ।।

३२-।।।।।ऽऽऽ त्रिभुवन पती रामो, वितरति सर्दाभीष्टम् ।
शमभिलषतां पुंसां, जगतिस समाराध्यः ।।

३३-ऽऽऽऽऽ।ऽऽ ध्यातः सद्भि र्मानसेषु, नित्यानन्दं य स्तनोति ।
सर्ग स्थित्यत्यय हेतुं, तं त्रैलोक्येशं भजामि ।।

३४-।ऽऽऽऽ।ऽऽ दयालुर्लोकाभिरामो, विरामो भक्तापदां यः ।
स सर्वाभीष्ट प्रदाता, प्रदेयात् सन्मङ्गलानि ।।

३५-ऽ।ऽऽऽ।ऽऽ राघवस्त्राता समेषां, सर्वथा श्रेयस्करोऽसौ ।
योगिभिर्ध्येयो हृदन्तः, मोह पाशं मे छिनत्तु ।।

३६-।।ऽऽऽ।ऽऽ अहमुद्विग्नो भवाब्धेः, कृपया मामुद्धराशु ।
मयि दृष्टिं देहि राम, ममता बन्धो व्मपैतु ।।

३७-ऽऽ।ऽऽ।ऽऽ संसार सिन्धौ निमग्नम्, श्रीराम मामुद्धरस्च ।
व्यासक्ति मुक्तं दयालो, चित्तं त्वयिस्याद् विलग्नम् ।।

३८-।ऽ।ऽऽ।ऽऽ जटायु पक्षान् निकृत्य, गतासु प्रायं विधाय ।
जहार सीतां रथेन, जवेन लङ्काधिनाथः ।।

३९-ऽ।।ऽऽ।ऽऽ छद्म मृगं तं निपात्य, स्वाश्रम मालोक्य शून्यम् ।
भूमिसुतां मार्गमाणो, व्याकुल आसिष्ट रामः ।।

४०-।।।ऽऽ।ऽऽ हुतभुजागृध्रराजं, सपदि संस्कृत्य रामः ।
क्वचिदनाप्यात्म भार्यां, घन मरण्यं ससार ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

४१-ऽऽऽ।ऽ।ऽऽ संगत्यानिलात्मजेन, सुग्रीवं व्यधात् सखायम् ।
साहाय्येन तस्य रामो, लङ्कामभ्ययादभीकः ॥

४२-।ऽऽ।ऽ।ऽऽ समाराधनं तु विष्णोः, जगत्यां शिवं समेषाम् ।
अतः श्रेयसे सुधीभिः, सदा राम–नाम चिन्त्यम् ॥

४३-ऽ।ऽ।ऽ।ऽऽ मोह पाश यन्त्रितोऽस्मि, वेद्मि नैव कर्म सम्यक् ।
न स्मरामि सर्ववन्द्यम, रामनाम चिन्तनीयम् ॥

४४-।।ऽ।ऽ।ऽऽ विषयैः सितो हि लोकः, स्वहितं न वेत्ति किंचित् ।
अतएव मोह बद्धो, भजते स तान् नितान्तम् ॥

४५-ऽऽ।।ऽ।ऽऽ भोगा विदुषा न सेव्याः, शान्तिर्न हि तैः कदापि ।
लक्ष्यं चरमं यतः सा, तामाप्तु मतो विचिन्त्यम् ॥

४६-।ऽ।।ऽ।ऽऽ कदापि शुभंयुनेह, परापकृतिर्न कार्या ।
सदात्म समं निरीक्ष्य, परोपकृतिर्विधेया ॥

४७-ऽ।।।ऽ।ऽऽ हृद्रिपु निपीडितं मां, कर्म वशगं विमूढम् ।
संसृति समुद्र मग्नं, राघव समुद्धरस्व ॥

४८-।।।।ऽ।ऽऽ भ्रमयति भूतचक्रम्, विलसति मानसे यः ।
वितरति सर्वं मिष्टं, जयति स राघवेन्द्रः ॥

४९-ऽऽऽऽ।।ऽऽ सायोध्या भूतलरत्नम्, श्रेष्ठा सर्वासु पुरीषु ।
श्री रामोऽराजत यत्र, विष्णुर्यो मानव रूपः ॥

५०-ऽऽऽ।।ऽऽ न शक्या योधयितुं या, जगद्वीर प्रसवित्री ।
अयो ध्यायन्त्यपि दर्पाद्, अयोध्या सा प्रथितात्र ॥

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उष्णिक्

५१-ऽ।ऽऽ।।ऽऽ निर्मिता या मनुनाप्राग्, राजधानी भुवि दिव्या ।
राजते सा सुसमृद्धा, पालिता मानव भूपैः ।।

५२-।।ऽऽ।।ऽऽ अथ वैवस्वत नाम्ना, मनुरासीद् भुवि राजा ।
प्रथमो भूमिभृतां स, रवि वंशो यत आस ।।

५३-ऽऽ।ऽ।।ऽऽ संसार सिन्धु निमग्नम्, अज्ञान संतमसान्धम् ।
मोहाविपाश निवद्धं, रामाशु माँ परिपाहि ।।

५४-।ऽ।ऽ।।ऽऽ रजोनिमीलित नेत्रा, न पारयन्ति विवेक्तुम् ।
क्वचिद् हि धर्ममधर्मम्, अतो रजः परिहेयम् ।।

५५-ऽ।।ऽ।।ऽऽ मानव एष विदध्यात्, सन्तत मत्र प्रयत्नम् ।
मानसरोग निवृत्यै, हन्त ! यत स्तनु बन्धः ।।

५६-।।।ऽ।।ऽऽ अविरतं हरि चिन्ता, जगति जीवन सारः ।
जहिहि भोग वितृष्णा, मिति भवेदपवर्गः ।।

५७-ऽऽऽ।।।ऽऽ श्रीरामो मनसि चिन्त्यो, हेया मानसिक दोषाः ।
सत् सङ्गः सतत सेव्यः, संसाराब्धितरणाय ।।

५८-।ऽऽ।।।ऽऽ स रामो मनसि जप्यः, स्वधर्मो न समुपेक्ष्यः ।
न हेयं विपदि धैर्यम्, अहिंसा परमधर्मः ।।

५९-ऽ।ऽ।।।ऽऽ जीवितं क्षण विनाशि, शाश्वतं किमपि नात्र ।
जागृहि त्वरित मात्मन्, संजहीहि मृग तृष्णाम् ।।

६०-।।ऽ।।।ऽऽ परिचिन्तय हृदीशम्, अखिलं क्षणिक मेव ।
भव सिन्धु तरणाय, हरिपादतरिरत्र ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

६१-ऽऽ।।।।ऽऽ गन्धर्व नगर तुल्यं, सर्वं कलय सरवेऽत्र ।
सत्यं हरि गुण गानं, जीवं सफलय तेन ।।

६२-।ऽ।।।।ऽऽ भवाब्धि तरणि मीशं, भजध्व मनिशमत्र ।
जनाः सपदि तरीतुं, चिरं शम मधि गन्तुम् ।।

६३-ऽ।।।।ऽऽ संस्मर सतत मीशं, विस्मर विषय भोगान् ।
संचिनु सुकृत मत्र, दुष्कृत मपनयाशु ।।

६४-।।।।।।ऽऽ परहित मिह कार्यम्, सुकृत मपरिहार्यम् ।
हृदि सतत निधेयं, हरि चरण सरोजम् ।।

६५-ऽऽऽऽऽऽ।ऽ सद् वृत्तं वित्तं मानवैः, संरक्ष्यं यत्नेनानिशम् ।
त्याज्यं कर्माविद्यं सदा, संधार्यं धैर्यं सर्वथा ।।

६६-।ऽऽऽऽऽ।ऽ हरिः संसेव्यः संततम्, स्वमुद्धर्तुं चेदिच्छसि ।
भवाब्धिर्नूनं दुस्तरः, प्रयत्नेनान्येनायकम् ।।

६७-ऽ।ऽऽऽऽ।ऽ अर्थमूलं सर्वं जगद्, बुद्धिमानेतच्चिन्तयेत् ।
वस्तुतोऽर्थ श्चिन्त्योधिया, आत्मनीनो नूनं भवेत् ।।

६८-।।ऽऽऽऽ।ऽ श्रुति वाक्यैः संश्रूयताम्, उपपत्त्या सं मन्यताम् ।
निज मुद्धर्तुं मानवैः, अयमात्मा ध्येयोऽनिशम् ।।

६९-ऽऽ।ऽऽऽ।ऽ लोकस्तु कर्म बन्धनः, तत् कर्म शास्त्रै र्बोधितम् ।
कार्यं प्रयत्नान् मानवैः, स्याद् येन लोकोऽयंशुभः ।।

७०।ऽ।ऽऽऽ।ऽ हितं विचिन्त्यं प्राणिनां, न कोऽप्यतो धर्मः परः ।
कदापि कार्यं नाहितम्, यतः परं तत् पातकम् ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

७१-ऽ।।ऽऽऽ।ऽ राम कृपा श्रेयस्करी, सा सुलभा सत् सङ्गतः ।
संचित पुण्योद्रेकतः, स्यात् सह सद्भिः संगमः ।।

७२-।।।ऽऽऽ।ऽ जगति सर्वं नश्वरम्, हृदि विचिन्त्यं सर्वथा ।
अनिशमार्यः संयमः, रहसि चिन्त्यः श्रीहरिः ।।

७३-ऽऽऽ।ऽऽ।ऽ श्रीरामो भवाब्धेस्तरिः, अन्यत् साधनं न ध्रुवम् ।
हित्वान्पद् ध्रुवं सेव्यताम्, श्रेयस्ते भवेन्नान्यथा ।।

७४-।ऽऽ।ऽऽ।ऽ अवस्थासु सर्वास्वपि, शुभं काङ्क्षता सर्वतः ।
सदा चिन्तनीयो हरिः, स्वमुद्धर्तुं मेषा सृतिः ।।

७५-ऽ।ऽ।ऽऽ।ऽ साम्य मादधन्न क्वचिद्, नैकरूपतां कर्हिचित् ।
नन्दयन्नथो तापयन्, लोक एष दोषाकरः ।।

७६-।।ऽ।ऽऽ।ऽ चरितं प्रशस्यं यदि, नहि चिन्तनीयं तदा ।
इह सच्चरितं यतः, समुपैति सर्वो गुणः ।।

७७-ऽऽ।।ऽऽ।ऽ रामः सकलाभीष्टदः, संसार पयोधौ तरिः ।
आपन्न समुद्धारको, ध्येयः स हि नित्यं हृदि ।।

७८-।ऽ।।ऽऽ।ऽ पितुर्वचनं पालयन्, वने निवसन् राघवः ।
तपस्वि जनान् रक्षितुं, चकार हि रक्षःक्षयम् ।।

७९-ऽ।।।ऽऽ।ऽ अत्रि मुनिना मोदितो, दण्डक वनं प्राप्तवान् ।
तत्र खरादि राक्षसान्, संनिहतवान् सानुगान् ।।

८०-।।।ऽऽ।ऽ निज जन संरक्षकः, सततमभीष्टप्रदः ।
व्यसन समुच्छेदकः जयति स रामः प्रभुः ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उष्णिक्

८१-ऽऽऽऽ।ऽ।ऽ सीताजाने जनानव, सर्वापद्भ्यः समुद्धर ।
पापेभ्यो दूर मुन्नय, धर्मे नित्यं मतिं कुरु ॥

८२-।ऽऽऽ।ऽ।ऽ स्वदेश प्रेम मानसे, जनानामस्तु संततम् ।
समत्वं स्यात् परस्परं, न विद्रोहः कदाचन ॥

८३-ऽ।ऽऽ।ऽ।ऽ जन्मभूमिः स्वमातृवत्, पूजनीया सदा नृणाम् ।
सा हि प्राणैः पणैरपि, रक्षणीया प्रयत्नतः ॥

८४-।।ऽऽ।ऽ।ऽ अपि नाकाद् गरीयसी, जननी जन्म मेदिनी ।
इय मुक्तिः सनातनी, सुविचार्यानिशं हृदि ॥

८५-ऽऽ।ऽ।ऽ।ऽ यस्याः शुभाङ्ग लालिता, अन्नै रसैः समेधिताः ।
पुष्टा यदीय पांसुभिः, वन्द्या हि सा वसुन्धरा ॥

८६-।ऽ।ऽ।ऽ।ऽ जगत्यशेषमानवाः, परस्परं स्व बान्धवाः ।
उदार एष आशयः, निधीयतां स्वमानसे ॥

८७-ऽ।।ऽ।ऽ।ऽ ईश्वर एक एव सः, विश्व मिदं हि तद् वशे ।
काम मनेक नामभिः, तं प्रवदन्ति मानवाः ॥

८८-।।।ऽ।ऽ।ऽ वलयितुं स्वतन्त्रतां, प्रयतनीय मात्मना ।
परवशं तु जीवनम्, नहि बुधैः प्रशस्यते ॥

८९-ऽऽऽ।।ऽ।ऽ अभ्याकाश महर्निशम्, पश्यन्तोऽपि जलाशया ।
जीवा दैवप्रकोपतो, नेक्षन्ते जलदावलिम् ॥

९०।ऽऽ।।ऽ।ऽ अनावृष्टि प्रभावतः, प्रदेशे परितोदिशम् ।
सरः कूप ह्रदादिषु, जलस्याभवदल्पयः ॥

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

९१-ऽ।ऽ।।ऽ।ऽ यत्न आशु विधीयतां, मानवेन गुणार्जने ।
आदरं लभते नहि, निर्गुणो मनुजो भुवि ।।

९२-।।ऽ।।ऽ।ऽ गुण संग्रहणे जनः, प्रयतेत यथामति ।
धन मादर मुच्चतां, गुणवाँल्लभते शनैः ।।

९३-ऽऽ।।।ऽ।ऽ दैवे विमुखतां गते, विद्यादि गुण राशयः ।
यच्छन्ति सुफलं नहि, यत्नैरपि कदाचन ।।

९४-।ऽ।।।ऽ।ऽ विना पुरुष कारेण, न दैव मपि सिध्यति ।
अतो मतिमता सदा, विधेय मिह पौरुषम् ।।

९५-ऽ।।।।ऽ।ऽ पौरुषमवलम्ब्य यः, साध्यमनु प्रवर्तते ।
सिद्धिमधिकरोति सः, विन्दति सुफलां श्रियम् ।।

९६-।।।।।ऽ।ऽ स्ववल मवलम्बितुः, विधिरपि सहायकृत् ।
निज बलमतः श्रय, विधि वल मपा कुरु ।।

९७-ऽऽऽऽऽ।।ऽ एतत् त्रैलोक्यं सृजति, चापद्भ्यो यः पालयति ।
प्राप्ते काले संहरते, सर्वाध्यक्षं तं भजत ।।

९८-।ऽऽऽऽ।।ऽ समस्ताभीष्टं ददते, भवाब्धेः पारं नयते ।
इदं विश्वं योऽवति तं, त्रिलोकी नाथं भजत ।।

९९-ऽ।ऽऽऽ।।ऽ यस्य बुद्धिर्धर्मरता, कर्म निष्ठोऽसौ भुवने ।
तस्य नान्यत् किंचिदपि, साधनीयं प्राप्यमिह ।।

१००।।ऽऽऽ।।ऽ अथ मोहान्धानवशान्, भवसिन्धुं पारयति ।
करुणा सिन्धुर्भवताद्, अवधेशो नस्तरारणिः ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

१०१-ऽऽ।ऽऽ।।ऽ क्षुद्रोऽपि योगान्महतां, लोके प्रयात्युच्च पदम् ।
नोच्चैः पदारूढिरपि, पुंसो गुणान् सूचयति ।।

१०२-।ऽ।ऽऽ।।ऽ कृत प्रयत्नः सुगतिं, कदाचिदे वाप्तु मलम् ।
विधौ प्रसन्ने लभते, लघु प्रयासोऽपि नरः ।।

१०३-ऽ।।ऽऽ।।ऽ रव्यापयितुं स्वं गुणिनं, नीचमनुष्यः सततम् ।
छद्म परो दर्शयते, साधु-गुणान् स्वेऽप्यसतः ।।

१०४-।।।ऽऽ।।ऽ जगति वाणी कुशलाः, सतत काम्यं मनसः ।
समधि गच्छन्त्यखिलम्, असुलभं यच् श्रमतः ।।

१०५-ऽऽऽ।ऽ।।ऽ स्वातन्त्र्य सुखं परमं, प्राप्तुं तद् बुधो यतताम् ।
शारीरं मनाक् सुहितम् अध्यात्मं तदाप्रलयम् ।।

१०६-।ऽऽ।ऽ।।ऽ गुण ग्राहका विरलाः, प्रशंसन्ति चाटु वचः ।
प्रसीदन्ति संस्तुतिभिः, विवेकाक्षमाः पुरुषाः ।।

१०७-ऽ।ऽ।ऽ।।ऽ प्राप्तुमीप्सितिं पुरुषः, पौरुषं समाश्रयतु ।
नैव तद् विना जगति, स्यान्मनोरथः सफलः ।।

१०८-।।ऽ।ऽ।।ऽ अपिदुर्लभं लभते, स्व परिश्रमेण जनः ।
अतएव बुद्धिमता, परिलभ्यतां स सदा ।।

१०९-ऽऽ।।ऽ।।ऽ दृश्यं सकलं सृजति, जीवान् परिपालयति ।
आत्मन्युप संहरति, रामो जगतामधिपः ।।

११०-।ऽ।।ऽ।।ऽ निरस्यति मोह तमः, तनोति शिवं सततम् ।
गिरं प्रणयामि हृदा, प्रयच्छति या प्रतिभाम् ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

१११-ऽ।।।ऽ।।ऽ चिन्तय सदा हृदये, चरणौ हरेः शुभदौ ।
इच्छसि निजं सफलं, जन्म यदि मानव रे ।।

११२-।।।।ऽ।।ऽ विषयरसाद् विरतिः, हरिचरणाभिमुखी ।
भवति सदा यमिनां, जनयति शं परमम् ।।

११३-ऽऽऽऽ।।।ऽ चित्तेध्येयो रघुपतिः, लोकाध्यक्षः शरणदः ।
अन्तर्यामी विजयते, शश्वत् त्राता सुकृतिनाम् ।।

११४-।ऽऽऽ।।।ऽ तरीतुं दुस्तर मिमं, भवाब्धि वाञ्छसि चेत् ।
अहोरात्रं भज हरिं, दयालुं सिन्धु तरणिम् ।।

११५-ऽ।ऽऽ।।।ऽ लोकबाधां शमयते, धर्म रक्षां वितनुते ।
चिन्तनीगो हृदि हरिः, त्रापते यः सुकृतिनः ।।

११६-।।ऽऽ।।।ऽ सततं चिन्तय हरिं, चर धर्मं विभवतः ।
विषयासक्तिमपनय, शमयान्तारिपुगणम् ।।

११७-ऽऽ।ऽ।।।ऽ माया हरेर्व्यथयते, लोके विपश्चितमपि ।
रामाश्रयात् तरति तां, कोऽपीह संयतमनाः ।।

११८-।ऽ।ऽ।।।ऽ कृतघ्न एष पुरुषः, सदोपकारिणमपि ।
प्रपीडयत्पतितरां, मनः सतां व्यथयते ।।

११९-ऽ।।ऽ।।।ऽ लोभवशादिह जनो, विन्दति निन्दित मपि ।
पाप निदान मुदितः, सद्भिरतो रिपुसमः ।।

१२०-।।।ऽ।।।ऽ सतत मात्म निरतो, विगत सर्व विषयः ।
स्वमिव पश्यति समं, तरति शोक मिह सः ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

१२१-ऽऽऽ।।।।ऽ भक्ताभीप्सित वरदो, विश्वात्मा जगदधिपः ।
निध्यातो हृदि सुजनैः, श्रीरामो वितरति शम् ।।

१२२-।ऽऽ।।।।ऽ स्वमायारचित मिदं, हृदिस्थो भ्रमयति यः ।
अहं चिन्मय मनिशं, तमीडे पुरुष मजम् ।।

१२३-ऽ।ऽ।।।।ऽ राम नाम मणि धरः, सर्वभूत हित करः ।
विश्व वन्द्य सुचरितो, दिव्यतामनुभवति ।।

१२४-।।ऽ।।।।ऽ पुरुषः प्रकृति गुणान्, नितरामनुभवति ।
गुण सङ्ग वश गतो, विविधंहि संसरति ।।

१२५-ऽऽ।।।।।ऽ कस्मै चिदपि पुरुषो, द्रोहं न हि कथमपि ।
कुर्यादयमभिलषन्, जीवेच्छतमिह समाः ।।

१२६-।ऽ।।।।।ऽ परोपकृति सुकृतं, क्षमं नहि तुलयितुम् ।
कथं चिदपि सुसखे, तदर्जन मुपचिनु ।।

१२७-ऽ।।।।।।ऽ नास्त्यपकृति सदृशं, दुष्कृतमपर मिह ।
उन्मिष निजनयने, चेतय मनसि सखे ।।

१२८-।।।।।।।ऽ मुरलि मधुर रवैः, ब्रज जन सुख करः ।
स जयति यदुवरः, कर धृत गिरिवरः ।।

१२९-ऽऽऽऽऽऽऽ। दैत्यध्रुक् सर्वस्यान्तस्थ, त्रैलोक्याधीश श्रीराम ।
दीनानापन्मग्नान् देव, संसाराध्वभ्रान्तान् पाहि ।।

१३०-।ऽऽऽऽऽऽ। यतात्मा विद्यामाप्नोति, ददाति श्रेयः सा मङ्क्षु ।
तदेवावाप्यं लोकस्य, ततोऽन्यत् काम्यं किंचिन्न ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

१३१-ऽ।ऽऽऽऽऽ। संयमेनारं योगेन, संप्रसीदन्ति स्वान्तानि ।
मानवा विन्दन्तीष्टानि, श्रेयसे सोऽलं लोकेऽत्र ।।

१३२-।।ऽऽऽऽऽ। मनुजोऽभीष्टान्याप्नोति, सततं यन् सन्मार्गेण ।
सुतरां सिद्धयै यत्नेन, प्रसितः स्यात् कृत्येषु ।।

१३३-ऽऽ।ऽऽऽऽ। रक्षांसि हत्वा युद्धेषु, पूतानि धर्मारण्यानि ।
संस्थापिताः सद्धर्मेण, लोका विशोका रामेण ।।

१३४-।ऽ।ऽऽऽऽ। स्वजन्मनः साफल्याय, जगद् हिताय प्रोद्यम्य ।
निरन्तरं सत् कर्माणि, प्रयत्नतः संसाध्यानि ।।

१३५-ऽ।।ऽऽऽऽ। चेतय मोहं बन्धाय, चिन्तय विष्णोर्नामानि ।
संत्यज रागं स्पर्शेषु, कल्पय भोगान् दुःखानि ।।

१३६-।।।ऽऽऽऽ। भवति सद्भिः सङ्गेन, गुण निधानं मर्त्योऽत्र ।
तरति शोकं बोधेन, सपदि च स्वं जानाति ।।

१३७-ऽऽऽ।ऽऽऽ। आत्मानं सदा योगेन, विज्ञातुं नरः कुर्वीत ।
यत्नं जन्म साफल्याय, जायन्ते म्रियन्तेऽन्येतु ।।

१३८-।ऽऽ।ऽऽऽ। स्वधर्मं न जह्याज्जातु, विद्वानोऽपि दुर्दैवेन ।
अलं श्रेयसे जायते, यतः सोऽपरत्रात्रापि ।।

१३९-ऽ।ऽ।ऽऽऽ। लोक–शोक निर्णाशाय, कायवाग् धनैः प्राणैश्च ।
आचराशु सत् कर्माणि, नित्यमत्र किंचिन्नास्ति ।।

१४०-।।ऽ।ऽऽऽ। क्षण भङ्गुराणीमानि, सुतदार सद्मादीनि ।
अनुकम्पया भूतेषु, सख आचरेर्भद्राभि ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

१४१-ऽऽ।।ऽऽऽ। मैत्र्यादि मनो वृत्तीस्तु, ज्ञात्वा क्लेश प्रहाणेन ।
आत्मानमथो विन्देत, चित्ते सततं ध्यानेन ।।

१४२-।ऽ।।ऽऽऽ। स्वयं हृदि संस्थस्यैव, निजात्मन आतद्दृष्टि ।
कृती सततं ध्यानेन, यतेत समुद्धाराय ।।

१४३-ऽ।।।ऽऽऽ। आत्मनि मनः संयम्य, नित्यमखिलास्ववस्थासु ।
आत्मरतिरेवासीत, सोऽहमिति आनन्दोऽस्मि ।।

१४४-।।।।ऽऽऽ। अविरत मुत्कर्षेण, स्वमपि तिरस्कुर्वन्ति ।
लघव इहोन्मादेन, जनरव मागच्छन्ति ।।

१४५-ऽऽऽऽ।ऽऽ। अत्मारामाः प्रसीदन्ति, उच्चस्थाने निषीदन्ति ।
देहासक्ता विषीदन्ति, विपन्नाश्चावसीदन्ति ।।

१४६-।ऽऽऽ।ऽऽ। सदाचारं प्रशंसन्ति, महोत्कर्षाय भद्राय ।
अतोधीरास्तमालम्ब्द, पदं प्रोच्चैः प्रयान्ति हि ।।

१४७-ऽ।ऽऽ।ऽऽ। यः परार्थाय जागर्ति, प्राणिना भाति माहन्ति ।
आत्मवत् सर्व भूतेषु, लोक मान्यः स एवात्र ।।

१४८-।।ऽऽ।ऽऽ। पर कार्येषु रज्यन्ति, न च गर्वं प्रकुर्वन्ति ।
इह धर्मेण जीवन्ति, सुजनास्ते हि धन्याश्च ।।

१४९-ऽऽ।ऽ।ऽऽ। गङ्गा सुधोपमं स्वादु, नीरं ददाति लोकाय ।
भूमिं करोति कृष्यां च, लोकोपकारिणी सा हि ।।

१५०-।ऽ।ऽ।ऽऽ। हिमालयात् समुद्भूय, सुरापगा सुतीर्थानि ।
करोति भारतीयानि, मनोहराण्य शेषेण ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

१५१-ऽ।।ऽ।ऽऽ। पुण्यतमानिकूलानि, देवधुनी प्रसिक्तानि ।
निर्भर वन्दनीयानि, संतत सेवनीयानि ।।

१५२-।।।ऽ।ऽऽ। सुर धुनी प्रवाहेण, गिरिवनानि धौतानि ।
अमरवृन्द वन्द्यानि, सुचिर मत्र सेव्यानि ।।

१५३-ऽऽऽ।।ऽऽ। स्वर्णद्याः परिपूतानि, शर्वेणाप्यभिनन्द्यानि ।
अम्मांसीह सुसेव्यानि, पुण्यैरेव सुलभ्यानि ।।

१५४-।ऽऽ।।ऽऽ। अमर्त्यस्पृहणीयानि, तटानीह सुरम्पाणि ।
अपुण्यै र्नैव लभ्यानि, नरः को नहि सेवेत ।।

१५५-ऽ।ऽ।।ऽऽ। आमयाः परिशाम्यन्ति, जाह्नवी जल पानेन ।
तज्जलेन समानं तु, विष्टपे नहि सर्वत्र ।।

१५६-।।ऽ।।ऽऽ। कलुषं नहि कुर्वीत, सलिलं च प्रतीरं च ।
अहितं जन मात्रस्य, विमृशन् हृदि तत्त्वेन ।।

१५७-ऽऽ।।।ऽऽ। गङ्गा त्रिपथगं वारि, मूर्ध्ना धृत मपीशेन ।
लोकस्य शिवमाधातु, माब्धेर्वहति वेगेन ।।

१५८-।ऽ।।।ऽऽ। चतुर्मुख विधानेन, कमण्डलु धृतं ह्यास्त ।
भगीरथ तपःस्रावि, सदा जयति तद् वारि ।।

१५९-ऽ।।।।ऽऽ। यद् गिरिश शिरश्चारि, मौक्विक सरआभाति ।
शीतल धवलं स्वादु, तज्जल मखिलं पातु ।।

१६०-।।।।।ऽऽ। हिमगिरि सुते देवि, सुर मुनि सुसेव्यासि ।
पदमभयदं देहि, शरणमुपयातोऽम्ब ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

१६१-SSSSSISI स्रष्टा लोकानांत्वमेव, भर्ताविश्वस्यासि देव ।
संहर्ता शम्भो त्वमेव, मां पाया देवाधिदेव ॥

१६२-ISSSSISI जगन्नाथं त्वामुपैमि, भवाम्भोधेः पोतमीश ।
त्वदन्यं क्रन्वाश्रयामि, नहि त्रातान्यो ममास्ति ॥

१६३-SISSSISI रक्षकस्त्वं हे महेश, त्वद्विना नान्योममास्ति ।
जन्म बन्धादाशु मुञ्च, त्वामहं प्राप्तः शरण्य ॥

१६४-IISSSISI जगदम्बा वत्सफ्लास्ति, अपराधान् सा सुतस्य ।
सहते प्रीता सदैव, शरणं नान्यज् जनास्य ॥

१६५-SSISSISI सा त्वं प्रसीदाशु देवि, उन्मील्य चक्षुः प्रपश्य ।
आपद् गतोहं चिरेण, मातः स्व पुत्रे दयस्व ॥

१६६-ISISSISI चिराद् विषीदन्तमत्र, प्रकाश्य वात्सल्य मम्ब ।
निजाङ्क मारोप्य देवि, सुतं समाश्वासयाशु ॥

१६७-SIISSISI कुप्यति माता सुताय, न श्रुतपूर्वं कदापि ।
तद्विमुखीत्थं कथं नु, मय्यसि मातश्चिरस्य ॥

१६८-IIISSISI जननि पुत्रस्तवेह, जगदरण्यं भ्रमामि ।
गमय मार्गं दयस्व, सुचिर खिन्नोऽहमस्मि ॥

१६९-SSSISISI अन्तः शत्रवो यत्नेन, जेतव्याः शमीप्सुनेह ।
कल्याणाय सर्वथैव, सन्मार्गो बुधैर्न्यदेशि ॥

१७०-ISSISISI अजय्या असंयमेन, सपत्ना अमी नरेण ।
प्रयासः सदैव बुधेन, विधेयः सुसंयमाय ॥

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

१७१-ऽ।ऽ।ऽ।ऽ। शश्वदात्मनः शिवाय, मानवश्चिरं यतेत ।
जन्मनोऽस्य लाभ एषः, आत्ममुक्तये क्रमेत ॥

१७२-।।ऽ।ऽ।ऽ। पुरुषोऽनिशं परस्य, समभावतो हिताय ।
जगतीतले यतेत, परमार्थ एष एव ॥

१७३-ऽऽ।।ऽ।ऽ। सत् कर्म सदा नरेण, कार्यं न फलेप्सुनेह ।
ईप्सा ननु बन्धनाय, प्रोक्ता मुनिभिः फलस्य ॥

१७४-।ऽ।।ऽ।ऽ। विधाय यथात्मशक्ति, प्रयास मनेकधापि ।
अदृष्ट वशात् क्रियासु, जना विफलीभवन्ति ॥

१७५-ऽ।।।ऽ।ऽ। लोक प्रियतामुपैति, नीतिकुशलः क्रमेण ।
नीतिमत आदधीत, सर्वजनरञ्जनाय ॥

१७६-।।।।ऽ।ऽ। भवति विवेक एव, जगदघ संशमाय ।
सपदि तदर्जनाय, सकल जनो यतेत ॥

१७७-ऽऽऽऽ।।ऽ। अन्तः शत्रून विजयेत, शान्तात्मा योगबलेन ।
सिद्धिः पाणौ लघु तस्य, जीवन्मुक्तः स इहैव ॥

१७८-।ऽऽऽ।।ऽ। स्मरन्तः श्री हरिनाम, जना दुर्गाणि तरन्ति ।
कलौ पापान्यखिलानि, हरेर्भामानि हरन्ति ॥

१७९-ऽ।ऽऽ।।ऽ। लोक संघाः समवेत्य, भ्रातृ भावेन ऋतेन ।
सुप्रसन्ना बिलसन्तु, भारतं येऽधिवसन्ति ॥

१८०-।।ऽऽ।।ऽ। इह लोका निवसन्तु, समता भावमुपेत्य ।
सहसत्ता मवलम्ब्य, सुपथा यान्तु सुखेन ॥

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

१८१-ऽऽ।ऽ।।ऽ। ये मानवा भुविसन्ति, ते भ्रातरो हि समेऽपि ।
भेदो न साम्प्रतमस्ति, सद्भावनानिश मस्तु ॥

१८२-।ऽ।ऽ।।ऽ। सहानुभूतिरयास्तु, परस्परं स्वत एव ।
उदारभाव उदेतु, असंभ्रमोऽस्तु जनेषु ॥

१८३-ऽ।।ऽ।।ऽ। दैव वशाद् विषमेऽपि, स्वार्थरतो न कदापि ।
लोके हिताय यतेत, प्राहुरिदं शिवं वर्त्म ॥

१८४-।।।ऽ।।ऽ। जगति को नहि याति, मदवशं धनमाप्य ।
बहु धनं बिकरोति, जन मनः सततं तु ॥

१८५-ऽऽऽ।।।ऽ। उत्सेको न मनुजेन, कर्तव्यो धनमवाप्य ।
एकत्र स्थिर यिदं तु, विख्यातं जगति नैव ॥

१८६-।ऽऽ।।।ऽ। न दानेन सममत्र, प्रशस्वं किमपि वस्तु ।
नर स्तद्धि विदधीत, परत्रेह च शिवाय ॥

१८७-ऽ।ऽ।।।ऽ। इन्द्रियाश्व नियमाय, मानवः प्रयतनेन ।
आदधीत सततं हि, निग्रहं मनस एव ॥

१८८-।।ऽ।।।ऽ। कुटिलत्व मपहाय, हृदयात् त्वमपि मित्र ।
मुदितः पर हितेन, सकलैर्व्यवहरेत ॥

१८९-ऽऽ।।।।ऽ। दृश्यं सकलमपीह, लोके कलय मृषेव ।
मोहं परिहर मित्र, ध्यानं भगवति यच्छ ॥

१९०-।ऽ।।।।ऽ। मृषा जगदवगच्छ, जहीहि सकल माशु ।
सदा स्मर हरि मेव, निजं सफलय जन्म ॥

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

१९१-ऽ।।।।।ऽ। नश्वर मिद मवेत्य, संत्यज सममपीह ।
राम शरण मुपेहि, तत् प्रभवतु शिवाय ।।

१९२-।।।।।।ऽ। हरि पद रतिरेव, निरतिशय सुखाय ।
भव भय हरणाय, दुरधिगमपदाय ।।

१९३-ऽऽऽऽऽऽ।। मर्त्यः सक्तः स्वेकर्मणि, स्व स्वान्ते शान्ति विन्दति ।
धर्मात्मा शश्वज्जीवति, भोगार्थी दीन स्तिष्ठति ।।

१९४-।ऽऽऽऽऽ।। मनोभोगेभ्यो वारय, जनुर्बन्धान् मां मोचय ।
भवाब्धेः पारं पारय, हरे संसारा दुद्धर ।।

१९५-ऽ।ऽऽऽऽ।। श्रेयसे धर्मं संचिनु, दुःखिनो दुःखान्मोचय ।
अर्थिनां कामान् प्रय, कर्म योगं त्वं संश्रय ।।

१९६-।।ऽऽऽऽ।। क्षणिकं सर्वं चेतय, करणीयं सर्वं कुरु ।
हृदये रामं धारय, निज मात्मानं चोद्धर ।।

१९७-ऽऽ।ऽऽऽ।। दीने दयां नित्यं कुरु, धर्मानुरागं संतनु ।
गर्वं स्वचित्ते नोद्‌ह, संसार पाथोधिं तर ।।

१९८-।ऽ।ऽऽऽ।। हितं समेषामाचर, सुकर्म योगं चाश्रय ।
रमेश पादौ संस्मर, भवाब्धि पारं पारय ।।

१९९-ऽ।।ऽऽऽ।। शश्वद् ऋतां वाचं वद भूत दया भावं भज ।
कर्म विनिन्द्यं वर्जय, मानव लोकं साधय ।।

२००-।।।ऽऽऽ।। सचति धर्म्येकर्मणि, जगति सौख्यं विन्दति ।
पर हितार्थं जीवति, मनुज उच्चै राजति ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

२०१-ऽऽऽ।ऽऽ।। सद्यो मोह निद्रांत्यज, शान्ति चात्मना चिन्तय ।
विष्णोः पादपद्मं भज, संसाराम्बुधिं संतर ।।

२०२-।ऽऽ।ऽऽ।। हितं सन्ततं चिन्तय, फलं जन्मनः साधय ।
हरेर्नाम नावं श्रय, भवाम्भोधि पारं व्रज ।।

२०३-ऽ।ऽ।ऽऽ।। राम नाम शश्वज्जप, जन्मबन्धनं भञ्जय ।
शोक मोह जालं क्षिय, सर्वदुःख मुक्तो भव ।।

२०४-।।ऽ।ऽऽ।। अघराशि मुन्मूलय, भव बन्धनान्मोचय ।
परमेश मामुद्धर, लय मात्मना भावय ।।

२०५-ऽऽ।।ऽऽ।। श्रीराम पदाब्जं श्रय, तापत्रय मुक्तो भव ।
श्रेयो न परं ते नर, चित्ते सुधिया चेतय ।।

२०६-।ऽ।।ऽऽ।। सतामयनं साधय, सदा सुमतिं धारय ।
मनो विषयाद् वारय, सुखेन निजं तारय ।।

२०७-ऽ।।।ऽऽ।। विश्वपतिमाराधय, लोकहित मुद्भावय ।
मोह रिपु मुत्साद्य, साधुजन सङ्गं श्रय ।।

२०८-।।।।ऽऽ।। जन हित कार्यं कुरु, मनसि हरिं संस्मर ।
प्रभुतरणी मान्श्रय, सपदि भवाब्धि तर ।।

२०९-ऽऽऽऽ।ऽ।। आत्मारामः सदा भव, कामक्रोधौ समुत्सृज ।
जीवानां मङ्गलं तनु, दोषान् सर्वानपाकुरु ।।

२१०-।ऽऽऽ।ऽ।। सदा सत्यव्रतं चर, खलं दूरात् परित्यज ।
सतां मार्गं समाश्रय, परं श्रेयो विचिन्तय ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

२११-ऽ।ऽऽ।ऽ।। लोक कार्याणि साधय, नाम–कीर्ती उपार्जय ।
यस्य कीर्तिः स जीवति, जीवनं सत्फलं कुरु ।।

२१२-।।ऽऽ।ऽ।। जनतामङ्गलं तनु, जनता विष्णुरीरिता ।
जनताया हितं ननु, स्वकृते कल्पते भुवि ।।

२१३-ऽऽ।ऽ।ऽ।। रूक्षं वचः परित्यज, लोके हितं समाचर ।
उच्चैः पद त्वमाप्नुहि, मानं प्रशस्ति मर्जय ।।

२१४-।ऽ।ऽ।ऽ।। गृहाण सद् गुणान खलु, परस्य दुर्गुणं नहि ।
गुणार्जनं समाचर, मनो विशुद्ध मावह ।।

२१५-ऽ।।ऽ।ऽ।। लोक हितं विचारय, प्राणिरुजां निवारय ।
स्वार्थरतिं परित्यज, कीर्तिधनं सदार्जय ।।

२१६-।।।ऽ।ऽ।। जगदिदं विभावदं, क्षणिक मेव मानव ।
किमपि सारमत्र न, कलय सर्वं मात्मनि ।।

२१७-ऽऽऽ।।ऽ।। पादौ श्रृङ्खलितौ मम, गन्तुं क्वापि प्रभू नहि ।
संसक्तस्य विकर्मसु, सीदाम्यत्यधिकं खलु ।।

२१८-।ऽऽ।।ऽ।। समुद्योग परो भव, स्वदेशं प्रगतिं नय ।
समत्वं मत्र जन्मिषु, दयामावह दुःखिषु ।।

२१९-ऽ।ऽ।।ऽ।। अन्नमत्र सदा बहु, कन्दमूल फलानि च ।
ऋद्धि सिद्धि कृतं वसु, भारतं भुवि राजति ।।

२००-।।ऽ।।ऽ।। अचिरेण निरस्यति, प्रसृतं तम आत्मनि ।
विदुषां जननी ननु, सुरभारती दीव्यतु ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

२२१-ऽऽ।।।ऽ।। श्रेयो वितर संप्रति, प्रज्ञा प्रसर मुन्नय ।
अज्ञान तिमिरं हर, पातादमरभारति ।।

२२२-।ऽ।।।ऽ।। दयामयि सरस्वति, दयां मयि प्रसारय ।
प्रदेहि प्रतिभामपि, गिरं मम विभूषय ।।

२२३-ऽ।।।।ऽ।। मा सुत मवधीरय, सत्वर मुपलालय ।
निर्गुण मपिपालय, मात रिमक मेधय ।।

२२४-।।।।।ऽ।। हरि मनुदिनं जप, परजनहितं तनु ।
सुकृत परमो भव, नर तनुफलं भजं ।।

२२५-ऽऽऽऽऽ।।। माता मामङ्कंनयतु, दोषान्मे सर्वान् हरतु ।
अर्थान् रम्पान् दर्शयतु, सद्योभीष्टं पूरयतु ।।

२२६-।ऽऽऽऽ।।। असारं सर्वं जगति, सदात्मारामो भवतु ।
चिदानन्दं चावहतु, भवाब्धेः पारं ब्रजतु ।।

२२७-ऽ।ऽऽऽ।।। सूनृतां वाचं वदतु, श्रेयसे यत्नं चरतु ।
आत्मतत्त्वं चिन्तयतु, जन्मबन्धं कर्तयतु ।।

२२८-।।ऽऽऽ।।। हरि पादाब्जं स्मरतु, सुकृते मग्नो भवतु ।
दलिते दानं दिशतु, उभयं लोकं जयतु ।।

२२९-ऽऽ।ऽऽ।।। लोका रमेशं भजत, दीने दयामाचरत ।
सत्यव्रतं धारयत, संसार सिन्धुं तरत ।।

२३०-।ऽ।ऽऽ।।। हितं मनोहारि वद, परापकारं जहिहि ।
मनो रमेशे रमय, यतो न सारं जगति ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

२३१-ऽ।।ऽऽ।।। दुर्जन सङ्गं त्यजत, धर्मं मजस्रं चरत ।
लोक हितान्यातनुत, नाम लभध्वं जगति ।।

२३२-।।।ऽऽ।।। जगति रामं भजत, विपदि धैर्यं धरत ।
सुजन सङ्गं कुरुत, सपदि मुक्तिं श्रयत ।।

२३३-ऽऽऽ।ऽ।।। विष्णोर्नाम संस्मरत, कार्याण्याशु साययत ।
व्यापन्ने दयां कुरुत, लोके कीर्तिं मर्जयत ।।

२३४-।ऽऽ।ऽ।।। विनिन्द्यानि संत्यजत, परार्थं समाचरत ।
दयाधार माश्रयत, लोकधन्यतां भजत ।।

२३५-ऽ।ऽ।ऽ।।। रामनाम मन्त्रमिह, नित्यमेव चिन्तयत ।
सार हीन मेतदिति, मानसे विचारयत ।।

२३६-।।ऽ।ऽ।।। अपरत्र कोऽपि नहि, सह यातृको भवति ।
कृत मेव याति सह, हृदये विभावयत ।।

२३७-ऽऽ।।ऽ।।। बुध्यस्व सखे सपदि, मोहं जटिलं जहिहि ।
कालोनिभृतं सरति, आयुस्तव चोरयति ।।

२३८-।ऽ।।ऽ।।। सदा मधुरो वचसि, नृलोक प्रियो भवति ।
जनो विनयेन ननु, यशो लभते जगति ।।

२३९-ऽ।।।ऽ।।। चेदभिरुचिर्यशसि, तर्हि सुकृतं कलय ।
आचर हितं जगति, मानव सुखं विहर ।।

२४०-।।।।ऽ।।। वचसि पटुः सदसि, जन मुकुटो भवति ।
ऋत मधुरं जगति, नहि सुलभं भवति ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

२४१-ऽऽऽऽ।।।। मिथ्या वादान् परिहर, पूतां वाणी मनुवद ।
अध्वानं साध्वनुसर, मान्यांल्लोकाननुचर ।।

२४२-।ऽऽऽ।।।। जनं रक्ष त्रिनयन, शिवं यच्छ स्मरहर ।
जनुर्बन्धं शिथिलय, स्वरूपं मामुपनय ।।

२४३-ऽ।ऽऽ।।।। मोह निद्रां व्यपनय, नित्य शत्रून् प्रशमय ।
आत्म बोधं निगमय, जन्म बन्धं विदलय ।।

२४४-।।ऽऽ।।।। वरिपाहि पुरहर, मम दोषान् न गणय ।
उपयातः शरणद, शरणं त्वामह मिह ।।

२४५-ऽऽ।ऽ।।।। न स्वेच्छया क्षणमपि, माता सुतं रहयति ।
यद्वत् सुपुत्र मवति, तद्वत् कुपुत्रक मपि ।।

२४६-।ऽ।ऽ।।।। दरिद्रता लघयति, गुणेन सज्जन मपि ।
जनो धनेन जगति, समादृतो हि भवति ।।

२४७-ऽ।।ऽ।।।। धूर्त जनोऽधिजगति, चाटुवचाः प्रभवति ।
लब्धुमिहोन्नति मति, साधुजनां स्तिरयति ।।

२४८-।।।ऽ।।।। पटु जनोभिभवति, गुणितया जगदपि ।
क्व गुणिनो न दधति, पद मिहोन्नत मति ।।

२४९-ऽऽऽ।।।।। संप्राप्ताञ्छरणमिह, सन्तोजातु न जहति ।
स्वप्राणानपि ददति, रक्षायै सुकृत मुत ।।

२५०-।ऽऽ।।।।। स्वकीयं निखिलमपि, परार्थे ह्यतिदिशति ।
सुखं विन्दति मनसि, महात्मेह विहरति ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्टुप्

२५१-ऽ।ऽ।।।।। आत्मबोध निधिरसि, स्वं विधेहि हित मिह ।
स्वस्य जन्म सफलय, चेतयात्मति सपदि ।।

२५२-।।ऽ।।।।। सुजनः सकलमपि, प्रदिशन्ननुभवति ।
सुखमात्मनि सपदि, स हि जीवति जगति ।।

२५३-ऽऽ।।।।।। विष्णोऽशरण शरण, त्वामेमि शरण मिह ।
त्रस्तः स्वजन सुखद, पाया वरद सपदि ।

२५४-।ऽ।।।।। हरे दितिजदलन, करं निधेहि शिरसि ।
प्रभो भव भय हर, प्रसीद जनशिवद ।।

२५५-ऽ।।।।।। पाहि सुजन शुभद, शेषशयन वरद ।
भक्त जन सुखकर, यच्छा शिव मघहर ।।

२५६-।।।।।।। अभयद जगदव, सुकृति वरद जय ।
भव भय मप हर, द्रुत मय मुपनय ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परि शिष्टम्

उक्तात्युक्तादि जाति समाख्यया प्रथिताना मेषां वृत्तानां संभविनां (समसंज्ञक) भेदानां विषये विशेष प्रतिपत्तये किञ्चिद वधेय मिद मुच्यते–

यथा– एकाक्षर पादवृत्ते एकम् अक्षरं गुरु ऽ अथवा लघु। एव संभवति, अतस्तत् प्रयुक्तौ द्वावेवभेदौ सम्मवतः ।

द्वयक्षर पाद वृत्ते तु द्वावपि वर्णौ गुरू ऽऽ अथवा लघू ।। क्वचिद् आदिमो वर्णो गुरुः द्वितीयश्च लघुः (ऽ।), क्वचिच्च प्रथमो वर्णो लघुः पश्चात्तनश्च गुरुः (।ऽ) इत्येवं प्रकारेण चत्वारो भेदाः सम्भवन्ति ।

यथा (१) ऽऽ (२) ।। (३) ऽ। (४) ।ऽ ।

एतेन ज्ञायते यत् पादे एकाक्षर वृद्धौ सत्याम् पूर्वापेक्षया द्विगुणा भेद संख्या सम्पद्यते। अत्रेदं वक्तव्यम् यद् एकाक्षर पाद वृत्ते द्व्यक्षर पाद वृत्ते वा परिमिताक्षरतया तेषां भेदानां स्वरूप निर्देशः स्वल्पधियामपि सुकरः। परं त्र्यक्षरादि पाद वृत्तेषु संभविनां सम संज्ञक भेदाना मेव समेषां यथायथं स्वरूप निर्देशो न सर्वजनसुकरः। तदवगमाय छन्दोग्रन्थेषु विस्तरेण प्रतिपादितोऽपि इह सर्वजन सौकर्याप 'वृत्तरत्नकार' निर्दिष्टः सरलतमः पन्था निरूप्यते–

तथापि– "पादे सर्व गुरा वाद्याल्लघुं न्यस्य गुरोरधः ।
यथोपरि तशेषंथा भूयः कुर्यादमुं विधिम् ।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऊने दद्याद् गुरूनेव यावत् सर्वं लघुर्भवेत् ।
प्रस्तारोऽयं समाख्यात श् छन्दो विचिति वेदिभिः ॥"इति

अयं भावः वृत्त पादे यावन्तो वर्णाः स्युः तावन्त एव प्रथम पङ्क्तौ सर्वे गुरव एव निर्देश्याः ।

यथा त्र्यक्षर पाद वृत्ते प्रथमो भेदः सर्व गुरु वर्णको विन्यस्यः SSS 'पादे सर्वं गुरौ' ।

ततः प्रथम गुरोरधः लघु निर्देश्यः, अवशिष्ट वर्णाश्च यथो परितथैव निर्देश्याः, ततश्च द्वितीयो भेदः ।SS इत्याकारकः संवृत्तः [लघुं न्यस्य गुरोरधः, यथोपरितथाशेषम्] पुनरग्रे विशेषतोऽ वधेय मिदम्-यद् यत्र आदौ एकः द्वौ त्रयश्चत्वार स्ततोऽधिका वा यावन्तो वर्णा लघवः स्यु स्तर्हि तदधः सर्वत्र गुरु निर्देश एव कार्यः, ततः औचित्पाद् लघुं न्यस्य गुरोरधः, यथोपरि तथा शेषम् इति प्रक्रिया अनुसर्तव्या—एवं च तृतीयो भेदः—
(ऊने दयाद् गुरूनेव, लघुंन्यस्य गुरोरधः, यथोपरितथाशेषम्) इति दिशा

SIS इत्याकारकः सम्पद्यते

एषा सर्वा प्रक्रिगा तावदनुविधेया यावत् सर्वा लघुः पादः भवेत् । ततश्च अग्रिम भेदे निरूपयितव्ये 'लघुं न्यस्य गुरोरधः, यथोपरि तथा शेषम्' इति नियमानुसारेण चतुर्थः भेदः ।IS इत्याकारकः सम्पद्यते ।

ततोग्रिमे भेदेनिर्देष्टव्ये आदौ वर्ण द्वयस्य लघुत्वेन तदधः गुरुद्वयनिक्षेपः, 'ऊने दद्याद् गुरूनेव' इत्युक्ते 'लघुं न्यस्य गुरोरध इति वचनाद् अवशिष्ट गुरोरधः लघु प्रक्षेपः ततश्च पञ्चमो भेदः SSI इति स्वरूपं भजते ।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततोऽग्रे 'लघुं न्यस्य गुरोरधः, यथोपरि तथा शेषम् इति न्यायात् षष्ठोभेदः ।ऽ। इत्याकारको भवति । ततोऽग्रे च 'ऊने दद्याद् गुरूनेव,' लघुंन्यस्य गुरोरधः, यथोपरि तथाशेषम्' इति सूत्रोक्त्या सप्तमोभेदः ऽ।। इति स्वरूपभाग् । ततश्चाग्रे 'लघुं न्यस्य गुरोरधः, यथोपरि तथा शेषम्' इति नियनाद् अष्टमो भेदः ।।। सर्वं लघुः सम्पद्यते । 'यावत् सर्वं लघुर्भवेदित्युक्तेः अग्रेन किमपि करणीयम् ।

इत्थम् उक्त प्रक्रियया त्र्यक्षर पाद्वृत्ते अष्टावेवभेदाः संभवन्ति । एते भेदा एव छन्दः शास्त्र मर्मज्ञैः क्रमशः मगण यगण रगण सगण तगण जगण भगण नगण ऽऽऽ, ।ऽऽ, ऽ।ऽ, ।।ऽ, ऽऽ।, ।ऽ।, ऽ।।, ।।। नामभि राख्यायन्ते ते चोपरि प्रदर्शित पद्धत्या सम्पद्यन्ते । तदुक्तं तत्रैव–

"सर्वं गुर्मो मुखान्तलौ यरावन्त गलौ सतौ ।
ग्मध्यायौ ज्भौ त्रिलोनोऽष्टौ भवन्त्यत्र गणास्त्रिकाः ।"

अर्थात्	मगणः	त्रिगुरुः	ऽऽऽ
	यगणः	आदिलघुः	।ऽऽ
	रगणः	मध्य लघुः	ऽ।ऽ
	सगणः	अन्त गुरुः	।।ऽ
	तगणः	अन्त लघुः	ऽऽ।
	जगणः	मध्य गुरुः	।ऽ।
	भगणः	आदि गुरुः	ऽ।।
	नगणः	त्रि लघुः	।।।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्येवं वर्ण त्रय-समष्टि प्रयुक्ता भेदा गण नाम्ना प्रसिद्धाः। उपरि निर्दिष्ट पद्धत्या वर्ण त्रयस्य विभिन्नैः प्रकारैः विन्यासः सरलतया सम्भूतः।

अभ्यास दार्ढ्याय पञ्चाक्षर पाद वृत्ते पुनरपि प्रस्तार क्रमोऽयं निर्दिश्यते–

१- SSSSS पादे सर्वगुरौ
२- ISSSS लघुं न्यस्य गुरोरधः, यथोपरि तथाशेषम्
३- SISSS ऊनेदद्याद् गुरूनेव, लघुंन्यस्य गुरोरधः यथोपरि तथा शेषम्
४- IISSS लघुंन्यस्य गुरोरधः यथोपरि तथा शेषम्।
५- SSISS ऊने दद्याद् गुरूनेव, लघुं न्यस्य गुरोरधः,यथोपरि तथाशेषम्
६- ISISS लघुं न्यस्य गुरोरधः, यथोपरि तथा शेषम्
७- SIISS ऊने दद्याद् गुरूनेव, लघुं न्यस्य गुरोरधः,यथोपरि तथा शेषम्
८- IIISS लघुं न्यस्य गुरोरधः, यथोपरि तथा शेषम्
९- SSSIS ऊने दद्याद् गुरूनेव, लघुं न्यस्य गुरोरधः,यथोपरि तथा शेषम्
१०- ISSIS लघुं न्यस्य गुरोरधः, यथोपरि तथा शेषम्
११- SISIS ऊने दद्याद् गुरूनेव, लघुं न्यस्य गुरोरधः,यथोपरि तथा शेषम
१२- IISIS लघुं न्यस्य गुरोरधः, यथोपरि तथा शेषम्
१३- SSIIS ऊने दद्याद् गुरूनेव, लघुं न्यस्य गुरोरधः,यथोपरि तथा शेषम्
१४- ISIIS लघुं न्यस्य गुरोरधः, यथोपरि तथा शेषम्
१५- SIIIS ऊने दद्याद् गुरूनेव, लघु न्यस्य गुरोरधः यथोपरि तथा शेषम्
१६- IIIIS लघुं न्यस्य गुरोरधः, यथोपरि तथा शेषम्
१७- SSSSI ऊने दद्याद् गुरूनेव, लघुं न्यस्य गुरोरधः
१८- ISSSI लघु न्यस्य गुरोरधः, यथोपरि तथा शेषम्।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१९- ऽ।ऽऽ। ऊने दद्याद् गुरूनेव, लघुं न्यस्य गुरोरधः,यथोपरि तथा शेषम्
२०- ।।ऽऽ। लघुं न्यस्य गुरोरधः, यथोपरि तथा शेषम्
२१- ऽऽ।ऽ। ऊने दद्याद् गुरूनेव, लघुं न्यस्य गुरोरधः,यथोपरि तथा शेषम्
२२- ।ऽ।ऽ। लघुं न्यस्य गुरोरधः, यथोपरि तथा शेषम्
२३- ऽ।।ऽ। ऊने दद्याद् गुरूनेव, लघुं न्यस्य गुरोरधः,यथोपरि तथा शेषम्
२४- ।।।ऽ। लघुं न्यस्य गुरोरधः, यथोपरि तथा शेषम्
२५- ऽऽऽ।। ऊने दद्याद् गुरूनेव, लघुं न्यस्य गुरोरधः,यथोपरि तथा शेषम्
२६- ।ऽऽ।। लघुं न्यस्य गुरोरधः, यथोपरि तथा शेषम्
२७- ऽ।ऽ।। ऊने दद्याद् गुरूनेव, लघुं न्यस्य गुरोरधः,यथोपरि तथा शेषम्
२८- ।।ऽ।। लघुं न्यस्य गुरोरधः, यथोपरि तथा शेषम्
२९- ऽऽ।।। ऊने दद्याद् गुरूनेव, लघुं न्यस्य गुरोरधः यथोपरि तथा शेषम्
३०- ।ऽ।।। लघुं न्यस्य गुरोरधः, यथोपरि तथा शेषम्
३१- ऽ।।।। ऊने दद्याद् गुरूनेव, लघुं न्यस्य गुरोरधः
३२- ।।।।। लघुं न्यस्य गुरोरधः, यथोपरि तथा शेषम् ।

(यावत् सर्वं लघुर्भवेद् इत्युक्तेः अग्रे गमनाद् निवृत्तिः)

एषैव प्रस्तारप्रक्रिया षडक्षरसप्ताक्षराष्टाक्षरादि पाद वृत्तेषु अपि अनुसर्तव्या ।

पादे एकाक्षर वृद्धौ सत्यां पूर्वापेक्षया समभेद संख्या द्विगुणा सम्पद्यते इति न विस्मर्तव्यम् ।

उक्त प्रक्रियां विना विभिन्न प्रकारैः नियत वर्णानां विन्यासः कठिन एव न परं नितरामसम्भव एव ।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रापरमपि जिज्ञासूनामवगन्तव्य मिति तदपि निरूप्यते–

उपरिनिर्दिष्ट पद्धत्या प्रस्तारित वृत्त भेदस्य कस्यापि यदि स्वरूपं विलुप्येत तर्हि तद् बोधाय चायमभ्युपायः–
तदुक्तं वृत्तरत्नाकरे–

"नष्टस्य यो भवेदङ्कः स्तस्यार्धेऽर्धे समे च लः ।
विषमे चैकमाधाय स्यादर्धेऽर्धे गुरुर्भवेत् ॥"

अयंभावः– विलुप्तस्य, जिज्ञासितस्य वा वृत्त भेदस्य संख्या समा (द्वाभ्यां विभाज्या) अस्ति तर्हि प्रथमम् लघुः लेख्यः पुनस्तदर्धे कृते यदि समा संख्या प्राप्यते तदापि लघुरेव । लेख्यः । यदि सा संख्या विषया (द्वाभ्याम् अविभाज्या) अस्ति तर्हि गुरुः ऽ लेख्यः विषम संख्याया अर्धीकरणं न संभवति अतस्तत्र एकं संयोज्य तदर्धं कर्तव्यम्, तत्र समत्वे लघुः विषमत्वे गुरुः इत्येवं प्रकारेण वाञ्छिताक्षर संख्या पूर्तिं यावद् अयं क्रमोऽनुवर्तनीयः ।

उदाहरणार्थम्– पञ्चाक्षर पाद वृत्तस्य सप्तदश भेद स्वरूपं यदि जिज्ञासितव्यम् तदा सप्तदश संख्याया विषमतया पूर्वं ऽ गुरुः लेख्यः, तदर्धीकरणं न संभवति अतः तत्र एकं संयोज्य तदर्धे कृते नव ९ संख्या प्राप्यते सापि संख्या विषमा अतः पुनरपि गुरुः ऽ लेख्यः । नव संख्याया विषमतया तदर्धीकरणं न संभवति अत स्तत्रैकं संयोज्य तदर्धीकृते पञ्च संख्या प्राप्यते तस्या अपि विषमतया पुनरपि गुरुः उल्लेख्यः पञ्च संख्याया अर्धीकरणं न सम्भवति अतस्त्रैकं मेलयित्वा तदर्धी कृते त्रिसंख्या

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राप्यते तस्या अपि विषमत्वेन गुरुः ऽ निर्देश्यः । तस्या अपि विषमतया तदर्धीकरणं न संभवति अतः तत्रापि एकं संयोज्य तदर्धीकृते द्विसंख्या प्राप्यते तस्याः समतया लघुः लेख्यः एवं च पञ्चाक्षर पाद वृत्तस्य सप्तदश भेद स्वरूपम् 'ऽऽऽऽऽ' इत्याकारकं प्राप्यते । पञ्चाक्षर पाद वृत्तस्य प्रस्तार प्रक्रियायाम् सप्तदश भेदे तादृश मेव स्वरूपं लभ्यत इति तदवलोकनेन सिद्धंभवति ।

एष चोपायः छन्दःशास्त्राज्ञैः नष्ट नाम्ना आख्यायते । अभ्यासाय च उदाहरणान्तरं प्रदीयते–

अथ पञ्चाक्षर पाद वृत्तस्य षोडशो भेदः किंःवरूप इति जिज्ञासितं स्यात् तर्हि पूर्वोक्त नियमानुसारेण षोडश संख्यायाः समत्वेन प्राग् लघुः । लेख्यः, तदर्धीकृते अष्ट संख्या प्राप्ता तस्या अपि समतया लघुरेव लेख्यः तदर्धीकृते चतुः संख्या प्राप्ता भवति तस्या अपि समतया लघुः निर्देश्यः तदर्धीकृते द्वि संख्या प्राप्यते तस्या अपि समतया लघुरेव लेख्यः तदर्धीकृते एक संख्या प्राप्यते तस्या विषमतया गुरुः ऽ लेख्य इत्थम् उक्त भेद स्वरूपम् ।।।।ऽ इत्याकारकं सिद्धं भवति । प्रस्तार प्रक्रियामपि तथैव अवलोकनाद् नियमस्य पुष्टिः भवति ।

अथ जिज्ञासितं स्याद् यद् अमुकाकारकः तस्य वृत्तस्य कतमोभेद इति तज्जिज्ञासोपशमाय प्रकारः प्रदर्श्यते–तदुक्तं तत्रैव– 'उदिष्टं द्विगुणा नाद्यादुपर्यङ्कान् समालिखेत् ।

लघुस्था ये च तत्राङ्कास्तैः सैकैर्मिश्रितैर्भवेत् ।। इति

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थाद् वाञ्छित स्वरूपे निर्दिष्टेषु वर्णेषु प्रारम्भाद् उत्तरोत्तरं संख्यां द्विगुणी कृत्य लिखेत्-तत्र लघु वर्णोपरि लिखित संख्यानां योगं विधाय तत्रैकमपरं योजयेत्– एवं या संख्या प्राप्यते ततम एव भेदः स ज्ञेयः । उदाहरणार्थम्–

पञ्चाक्षर पाद वृत्तस्य 'ऽऽऽ।।' इत्याकारकः कतमोऽयं भेद इति जिज्ञासितं तर्हि प्रथमाक्षरे एक सख्या, द्वितीयाक्षरे द्वि संख्या तृतीयाक्षरे चतुः संख्या, चतुर्थाक्षरे अष्ट संख्या, पञ्चाक्षरे च षोडश संख्या प्राप्यते तत्र लघु वर्णोपरि संख्या अष्टौ षोडश च ८ १६ तयोः मिश्रणे चतुर्विशति संख्या प्राप्ता भवति तत्रैकं संयोज्य पञ्चविंशति संख्या प्राप्यते ततश्च जिज्ञासितो भेदः पञ्चविंशः इति वक्तुं पार्यते प्रस्तार प्रक्रियाया मपि तथैव दर्शनात् तदेतत् प्रमाणितं भवति ।

एष चाभ्युपायः छन्दः शास्त्रे 'उद्दिष्ट' नाम्ना प्रथितः ।

एकाक्षर पादवृत्ते (उक्तायाम्) द्व्यक्षर पाद वृत्ते वा (अत्युक्तायाम्) परिमिताक्षरतया सर्व गुरु–सर्व लघु–एक गुर्वेक लध्वादि भेद गणना नायासे नैव परिज्ञाता भवति, परं त्र्यक्षरादि पाद वृत्तेषु (मध्यादिषु जातिषु) कियन्तो भेदाः एक गुरुकाः द्वि गुरुकाः, त्रि चतुरादि गुरुका वा, एक लघुकाः द्विलघुकाः त्रि चतुरादि लघवो वा संभवन्ति इति परिज्ञातुम् अय मुपायः प्रदर्श्यते– सर्व वृत्तेषु सर्व गुरुकः, सर्व लघुको वा भेदः एक एव भवति तदन्येषु भेदेषु एक द्व्यादि गुरु लघु संख्या ज्ञातव्या वशिष्यते । एष चोपायः छन्दोविद्भिः 'एकद्व्यादि लग क्रिया' नाम्ना व्यपदिश्यते । तदुक्तं तत्रैव–

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

"वर्णान् वृत्तभवान् सैकान् औत्तराधर्यतः स्थितान् ।
एकादिक्रमतश्चैतान् उपर्युपरि निक्षियेत् ॥
उपान्त्यतो निवर्तेत त्यजन्नेकैक मूर्ध्वतः ।
उपर्याद्याद् गुरो रेव मेकद्व्यादि लग क्रिया ॥"

अयंभावः– वृत्ते यावन्तो वर्णाः स्युः तान् एकेन सहितान् कृत्वा उत्तराधरभावेन लिखेत्–तान् अङ्कान् एकद्व्यादि क्रमेण उपरितनाङ्केन मेलयेत्–अर्थात् अधस्तन मेकाङ्कम् तदुपरितनैकाङ्केन मेलयित्वा द्व्यङ्कं कुर्यात्, तं तृतीयैकाङ्केन योजयित्वा त्र्यङ्कं कुर्यात् । एवम् उत्तरोत्तरं कुर्यात् । इत्थम् उपान्त्यपर्यन्तं मेतनं कृत्वा अन्त्येन अमेलयित्वा प्रत्यावृत्य एकैकं त्यजन् विरमेत् । उपान्त्यश्च सर्वत्र अन्त्याधो भावी ज्ञेयः । एकैक मिति वीप्सया सर्वाधस्तनाङ्क पर्यन्तं पुनः पुनः मेलनावृत्तिः कर्तव्येति सूच्यते ।

एवं कृते आद्यात् सर्व गुरोर्भेदात् उपर्यनन्तरम् एकद्वि त्र्यादीनां लघूनां क्रिया ज्ञेया ।

अयंभावः–प्रथमम् एको भेदः सर्व गुरुः, तदधस्तन संख्याका एकलघवो भेदाः, तदधस्तनाङ्क संख्या मिता द्विलघवो भेदाः तदधस्तनाङ्कसंख्याकाश्च त्रिलघवो भेदाः । एवमुत्तरोतराधो भाव्यङ्क संख्याकाश्चतुर्लघ्वादि भेदा अवगन्तव्याः ।

अत्र अन्त्याच्च सर्व लघोर्भेदात्-तदुपर्यङ्क संख्याकाः एक गुरुका द्वि गुरुका त्रि गुरुकाश्चतु गुर्रुकादिभेदा अपि बोध्याः ।

एतच्च उदाहरणैः स्पष्टी क्रियते–

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा– अत्युक्तायाम् (द्व्यक्षर पादवृत्ते)

१	एको भेदः सर्व गुरुः	SS
१ २	एक लघुकौ, एक गुरुकौवा	।S, S।
	द्वौ भेदौ	
१ १ १	एको भेदः सर्व लघुः	।।
	इत्थं मलयित्वा ४ चत्वारो भेदाः	

मध्यायाम् (त्र्यक्षर पाद वृत्ते)

१	एको भेदः सर्व गुरुः	SSS
१ ३	त्रयो भेदाः एक लघुकाः	।SS
		S।S
		SS।
१ २ ३	त्रयो भेदाः द्विलघुकाः	S।।
		।S।
		।।S
१ १ १ १	एको भेदः सर्व लघुः	।।।। मेलयित्वा ८ अष्टौभेदाः

प्रतिष्ठायाम् (चतुरक्षर पाद वृत्ते)

१	एको भेदः सर्व गुरुः
१४	चत्वारो भेदः एक लघुकाः
१३६	षड् भेदाः द्वि लघुकाः
१२३४	चत्वारो भेदाः त्रि लघुकाः
१११११	एकोभेदः सर्व लघुः, मेलयित्वा १६ षोडश भेदाः

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सु प्रतिष्ठायाम् (पञ्चाक्षर पाद वृत्ते)

१	एको भेदः सर्व गुरुः
१५	पञ्च भेदाः एक लघुकाः
१४१०	दश भेदाः द्वि लघुकाः
१३६१०	दश भेदाः त्रि लघुकाः
१२३४५	पञ्च भेदाः चतुर्लघ्युकाः
१११११	एको भेदः सर्व लघुः, मेलयित्वा ३२ द्वात्रिंशद्भेदाः

गायत्र्याम् (षडक्षर पाद वृत्ते)

१	एको भेदः सर्व गुरुः
१६	षड् भेदाः एकलघुकाः
१५१५	पञ्चदश भेदाः द्विलघुकाः
१४१०२०	विंशति भेदाः त्रिलघुकाः
१३६१०१५	पञ्चदश भेदाः चतुर्लघुकाः
१२३४५६	षड् भेदाः पञ्चलघुकाः
१११११११	एको भेदः सर्व लघुः, मेलयित्वा ६४ चतुःषष्टि भेदाः

एवम् अग्रेऽपि बोद्धव्यम् ।

उक्तादि संज्ञक जातीय वृत्तानां सम संज्ञकाः संभविनः कियन्तो भेदा इति जिज्ञासोपशमायेदमुच्यते–
तदुक्तं वृत्त रत्नाकरे–

"लगक्रियाङ्क सन्दोहे भवेत् संख्या विमिश्रिते ।
उद्दिष्टाङ्क समाहारः सैको वा जनयेदिमाम् ।।" इति

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थात् पूर्वोक्तायां लगक्रियायां येऽङ्काः तेषां परस्पर मेलने कृते या संख्या प्राप्यते तावन्त एव भेदाः विज्ञेयाः ।

अथवा

उद्दिष्टाङ्क क्रमेण लिखितानामङ्कानां समाहारे तत्रैक संख्या योजने सति या संख्या प्राप्यते तावत् संख्याका एव भेदाः अवगन्तव्याः ।

लगक्रिया प्रकारः उपरि व्याख्यातः । उद्दिष्टाङ्क समाहारोऽपि पूर्वं व्याहृतएव तत्रैकं मेलयित्वापि वृत्तस्य भेद संख्या वगमः सुकर इति ।

"उक्तादि जाति गत भेद परिज्ञानाय चक्रं प्रदर्श्यते"

क्रमाङ्कः	१	२	३	४	५	६	७
जाति नाम	उक्ता	अत्युक्ता	मध्या	प्रतिष्ठा	सुप्रतिष्ठा	गायत्री	उष्णिक्
अक्षर संख्या	१	२	३	४	५	६	७
भेद संख्या	२	४	८	१६	३२	६४	१२८

ततोऽग्रे

क्रमाङ्कः	८	९	१०	११	१२	१३
जाति नाम	अनुष्टुप्	बृहती	पङ्क्ति	त्रिष्टुप्	जगती	अति जगती
अक्षर संख्या	८	९	१०	११	१२	१३
भेद संख्या	२५६	५१२	१०२४	२०४८	४०९६	८१९२

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततोऽग्रे

क्रमाङ्कः	१४	१५	१६	१७	१८
जाति नाम	शक्वरी	अतिशक्वरी	अष्टिः	अत्यष्टिः	धृतिः
अक्षर संख्या	१४	१५	१६	१७	१८
भेद संख्या	१६३८४	३२७६८	६५५३६	१३१०७२	२६२१४४

ततोऽग्रे

क्रमाङ्कः	१९	२०	२१	२२	२३
जाति नाम	अति धृतिः	कृतिः	प्रकृतिः	आकृतिः	विकृतिः
अक्षर संख्या	१९	२०	२१	२२	२३
भेद संख्या	५२४२८८	१०४८५७६	२०९७१५२	४१९४३०४	८३८८६०८

ततोऽग्रे

क्रमाङ्कः	२४	२५	२६
जातिनाम	संकृतिः	अति कृतिः	उत्कृतिः
अक्षर संख्या	२४	२५	२६
भेद संख्या	१६७७७२१६	३३५५४४३२	६७१०८८६४

वृत्तस्य कस्य चित् प्रस्ताराय कियानव काशोऽपेक्षित इति तज् जिज्ञासोपशमाय उच्यते–

तदुक्तं वृत्त रत्नाकरे–

"संख्यैव द्विगुणैकोना सद्भिरध्वा प्रकीर्तितः ।
वृत्तस्याङ्गुलिका व्याप्ति रधः कुर्यात्तथाङ्गुलिम् ॥"

अयंभावः वृत्त भेदानां यावती संख्या पूर्वप्रदर्शित प्रकारैः प्राप्ता तां द्विगुणीकृत्य एकेन चोनयित्वा या संख्यावशिष्यते तावानेव अध्वा (वृत्त प्रस्तारावकाशः) अपेक्षित इति ।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा त्र्यक्षर पाद वृत्ते भेद संख्या ८ अष्ट मिता तां द्विगुणी कृत्य षोडश संख्या प्राप्ता ताम् एकेन ऊनयित्वा पञ्चदश संख्या प्राप्यते ततश्च त्र्यक्षर वृत्त प्रस्तारे कर्तव्ये पञ्चदशाङ्क-लिमितोऽवकाशोऽपेक्ष्यते ।

एते पूर्वोक्ता उपायाः प्रत्यया उच्यन्ते, यतः एभिरुपायैः संख्यादिक प्रतीयते । सम्भावितेषु वृत्तेषु विश्वासापरपर्याय प्रत्ययख्यापकत्वादपि प्रत्यया इति सार्थकं नाम । तेचोक्ता स्त्रत्रैव–

"प्रस्तारो नष्ट मुद्दिष्ट मेक द्व्यादि लग क्रिया ।
सङ्ख्यान मध्व योगश्च षडेते प्रत्ययाः स्मृताः ॥" इति

एते च यथायथयुपयोगितया व्याख्याता एव ।

उपरि सर्वत्र समवृत्त भेद संख्या निरूपिता । यदि अर्धसम वृत्तभेद संख्या जिज्ञासिता स्यात् तर्हि समवृत्त भेद संख्या तयैव गुणनीया ततः समभेद संख्यापनीया अवशिष्टा संख्या अर्ध समवृत्त भेद संख्या ज्ञेया ।

यथा त्र्यक्षरे वृत्ते सम संख्या ८ अष्टमिता, सा च तयैव गुणिता चतुः षष्टिः भवति । ततः शुद्ध संख्याम् ८ अष्टमिताम पनीय अवशिष्ट संख्याम् षट् पञ्चाशन्मिताम् अर्ध समवृत्त भेद संख्यां जानीयात् ।

यदातु तत्तज्जातिषु विषम भेद संख्या जिज्ञासिता तदा समभेद-संख्यायाम् तयैव गुणितायाम् या संख्या प्राप्ता भवति पुनः तयैव तां गुणयेत् । एवं गुणिता या संख्या प्राप्यते ततः

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

1375

समार्धं समभेद संख्ये अपनेतव्ये, अवशिष्टा संख्या विषम वृत्त भेदानाम् भवति ।

यथा त्र्यक्षरे समभेदाः ८, तैरेव गुणने चतुः षष्टिः, पुनः तयैव गुणने ६४×६४=४०९६ षण्णवत्यधिक चतुःसहस्राणि ततः समार्धसमवृत भेद संख्याम् ८+५६ चतुषष्टिम् अपनीय ४०३२ द्वात्रिंशदधिकचतुःसहस्राणि विषम वृत्त भेदान् विजानीयात् । एवमेव चतुरक्षरादि पादवृत्तेषु सर्वत्र ज्ञेयम् ।

त्र्यक्षर पाद वृत्तस्य प्रस्तार प्रसङ्गेन 'म-य-र-स-त-ज-भ-न' इत्याद्याक्षर संकेतिता अष्टौ गणाः प्रदर्शिता एव । ते च प्रायो वर्ण वृत्तेषु प्रयुज्यन्ते । आर्यादि जातिषु च गणाः चतुर्मात्रा एव उपयुज्यन्ते । चतस्रोमात्राश्च द्वयोर्वर्णयोः गुरुत्वे सम्पद्यन्ते 'भ-ज-स' गणेषु एक गुरुकेषु त्रिषु त्रिभिरक्षरैः जायन्ते, चत्वारो लघु वर्णा अपि मिलिताः चतुर्मात्राः सम्पद्यन्ते, एवं च आर्यादिषु सर्वं गुरुः ऽऽ, आदि गुरुः ऽ।।, मध्य गुरुः ।ऽ।, अन्तगुरुः ।।ऽ, सर्वं लघुः ।।।। इत्येवं क्रमेण जायमानाः पञ्च गणा उपयुज्यमानाः दृश्यन्ते । तद् बोधाय जिज्ञासूनां कृते तदुपन्यासोपीह कृतः । एतच्च वृत्त रत्नाकरे स्पष्टम् तथाहि–

ज्ञेयाः सर्वान्त मध्यादि गुरवोऽत्र चतुष्कलाः ।
गणाश्चतुर्लघूपेताः पञ्चार्यादिषु संस्थिताः ।। इति

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ते च

१	सर्व गुरुः	SS
२	अन्त गुरुः	।।S
३	मध्य गुरुः	।S।
४	आदि गुरुः	S।।
५	चतुर्लघुः	।।।।।

इत्याकारकाः सम्पद्यन्ते ।

आशा से, जिज्ञासूनां मनस्तोषो भविष्यति प्रतिपादितेनात्र जिज्ञासितव्येनेतिशम् ।

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुद्धि पत्रम्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
प्रकाशकीये	१	क्वाप्य	क्वाप्ये
अभिमते	१	PC	PU
,,	७	छन्दो	छन्दो
प्राक्कथने	४	हिद्ध	सिद्धा
१	१५	नस्मात्	तस्मात्
	१६	बतारा	वतार
	१७	गार	गारा
	,,	रूपण	रूपेण
२	१०	वशक	वश्यक
४	११	गतं	मतं
	१२	मद्य	पद्य
	१९	अष्पृ	अस्पृ
६	७	दावा	दाना
,,	८	लम्पनो	लभ्यन्ते
७	२२	काक्षर	एकाक्षर
,,	२३	सम्भा	सम्भ
,,	२७	यिस्य	यिष्य
५	६	हम्	हन्
६	२	नाव	नाथ
८	१०	रात्मो	रात्मे
९	१०	तूं	तुं
११	९	ssIss	ssIIss
१४	४	क्षान	शान
,,	१५	प्रमो	प्रभो
२०	४	जगदीशः	जगदधीशः
,,	१६	रामैहा	राम हा

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२४	१७	शोऽति	शोऽस्ति
,,	,,	नखिलान्	नखिलान्
३१	१५	कुर्पाः	कुर्याः
३२	८	मन्तयें	मन्तमें
३३	३	संदा	सर्वा
३४	२	प्ये	प्ये
	१९	तुं	तुं
३५	४	आस	आतं
	६	हावि	हाधि
३७	६	न्पद्	न्यद्
३९	२०	तशरणिः	तरणिः
४०	१३	प्सितिं	प्सितं
,,	२०	णयामि	णमामि
४१	१०	नीगो	नीयो
	,,	त्राप	त्राय
४२	१७	सर्वस्था	सर्वस्या
४३	२०	भद्राभि	भद्राणि
४४	१०	सवता	सक्ता
,,	१२	लम्व्द	लम्व्य
४५	१६	भ्रावि	स्रावि
४६	७	वत्सक्ला	वत्सला
,,	८	जनास्यं	जनस्य
,,	१८	कव्या	कल्या
४७	२	एसः	एष
	१६	भामानि	नामानि
४८	३	रया	रथा
,,	१०	यिदं	मिदं
,,	११	प्रशस्वं	प्रशस्यं

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४८	१६	रेत	रेह
४९	१४	नोद्ह	नोद्वह
५०	६	क्षिय	क्षिप
,,	१६	मानुश्रय	माश्रय
५१	११	वर्द	वर्ध
,,	१६	मत्र	भत्र
५३	५	साययत	साधयत
५४	७	वरि	परि
५५	२	त्मति	त्मनि
,,	१०	यच्छा	यच्छ
५७	१९	तथापि	तथाहि
,,	२०	तशेषंथा	तथा शेषं
५८	१४	दयाद्	देद्याद्
५९	५	नियनाद्	नियमाद्
,,	१२	मध्यायौ	मध्याद्यौ
६३	१६	प्रक्रियामपि	प्रक्रियायामपि
६४	११	पङ्च	पञ्च
६५	१०	मेतनं	मेलनं
६७	६	लघ्यु	लघु
,,	७	मेव	मेल
६८	१	पूर्वा	पूर्वो
	द्वितीय मुख्य पृष्ठे	सर्शे	सर्वे

(अत्र अनिर्दिष्टा अलक्षिता वा त्रुटयः स्वदं सुधीभिः संशोध्याः)

॥ अग्रवाल प्रिंटिंग प्रेस, रायबरेली ॥

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection.